RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
अज्ञश्चाश्रद्धधानश्च संशयात्मा विनश्यति।
नायं लोकोस्ति न परो न सुखं संशयात्मनः॥ (गीता)

दानेन तुल्यो निधिरस्ति नान्यो लोभाच्च नान्योस्ति परः पृथिव्याम्।
विभूषणं शीलसमं न चान्यत्संतोषतुल्यं धनमस्ति नान्यत्॥
(पंचतंत्र)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत - संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥
सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम्।
न च तद्धनलुब्धानामितश्चेतश्च धावताम्॥

क्रोधो वैवस्वतो राजा तृष्णा वैतरणी नदी।
विद्या कामदुघा धेनुः संतोषो नन्दनं वनम्।
(आचार्य चाणक्य)

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

卐 वर्षम्-१२ 卐 अंकः-२३ (२८७) नवदेहली 卐 १ जूनमासः २०२३तः १५ जूनमासः २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## वैदिकमंत्रोच्चारेण प्रधानमंत्रिणा नूतन संसद भवनस्य उद्घाटनं विहितम्

नवदेहली। प्रधानमंत्रीपूर्णविधिविधानेन नूतनसंसदभवनस्य उद्घाटनमकरोत्। तेन लोकसभाध्यक्षेण ओमबिरलावर्येण सह महात्मागांधिनः मूर्तौ पुष्पांजलिः अर्पितः तदनु हवने पूजायां च सम्मिलितः। तमिलनाडुतः आगताः साधवः अनुष्ठानं संपादितवन्तः। प्रधानमंत्री सेंगोलदण्डस्य पूजां कृतवान् साधुव्यः



साष्टांगं प्रणम्य तेषाम् आशीर्वादं स्व्यकरोत्। तदुत्तरं संसद परिसरे सर्व धर्म प्रार्थना सभा आयोजिता, यत्र प्रधानमंत्री नरेंद्र मोदी, कैबिनेट मंत्री अन्य राज्याणां मुख्यमंत्रिणः अनेके प्रतिष्ठित जनाश्च उपस्थिताः। सर्व धर्म सभायां बौद्धः, जैनः, पारसी, सिखः इत्येतान् समेत्य नैके धर्मगुरवः स्व प्रार्थनाम् अकुर्वन्। प्रधानमंत्री नरेंद्र मोदी उद्घाटनाद् परं भवननिर्मातृ श्रमिकान् सम्मानितवान्। उल्लेखनीयं यत् नूतन संसद भवने लोकसभायां 888, राज्यसभायायां 386 संख्याकां सदस्यानाम् उपवेष्टुं व्यवस्था अस्ति। एकः भव्य संविधान महाकक्षः अपि निर्मितः।, यत्र भारतस्य लोकतांत्रिक परंपराः प्रदर्शिताः। संसद भवनेस्मिन् उत्तर प्रदेशस्य मिर्जापुरस्य आस्तराणि, त्रिपुरीयकीचकेन कुट्टिमं राजस्थानस्य प्रस्तरेण कलाकृतिः, च भारतस्य सांस्कृतिक विविधताः दर्शितास्सन्ति। अमुस्मिन् अवसरे प्रधानमंत्री नरेंद्रमोदी सर्वेभ्यःदेशवासिभ्यः बर्धापनानि दत्वा अवोचत् यत् एतद्भवनं 140 कोटि भारतीयानाम् आकांक्षा प्रतिबिंबः अस्ति। अस्मल्लोकतंत्र मंदिरं च। नूतनभवनम् आत्मनिर्भर भारतस्य सूर्योदयस्य साक्षि वर्तते। अपरत्र विपक्षराजनीतिक दलानि अस्मिन् उद्घाटन समारोहे न सम्मिल्य तद् बहिष्कारमकुर्वन् यतः भवनस्यास्य उद्घाटनं राष्ट्रपतिना करणीयम्। इति तेषाम् अभिमतम् आसीत्।

## स्वामिश्रद्धानंदयज्ञशालायाः शिलान्यासः

हरिद्वारम्। गुरुकुल काँगड़ी समविश्वविद्यालयस्य, अभियांत्रिकी एवं प्रौद्योगिकी संकायेरुस्वामीश्रद्धानन्दयज्ञशालायाः शिलान्यासः कृतः स अवसरेस्मिन् उपस्थिताः शिक्षकाः शिक्षकेत्तर कर्मचारिणः छात्राश्च सम्बोधिताः तत्र यत् अस्यां भूमौ यज्ञेन दिनचर्या शुभारम्भः अस्मभ्यं गर्वास्पदं



की बात है। यज्ञाद् वातावरणं शुद्धयति विज्ञान एवं अनुसंधान द्वारा अपि इदं प्रमाणितम् । उपाधिपर्यन्तं सीमिताः न सन्तोऽपि अस्माभिः संस्कृतैः सांस्कृतिकैश्च भाव्यम् । अयं विश्वविद्यालयः राष्ट्राय नैकिन् विदुषः दत्तवान् । यज्ञशाला निर्माण समितेः अध्यक्षः प्रो0 विपुल शर्मा यज्ञशाला निर्माण शिलान्यास -अवसरे समागतेभ्यः अतिथिभ्यो धन्यवादं दत्तवान् । कार्यक्रमसंचालन डा0 धर्मेन्द्र कुमार बालियानः अकरोत। यज्ञः ब्रह्मणा डा0 वेदव्रतेन सम्पन्नः ।

स्वामी सम्पूर्णानन्दः, स्वामी यज्ञमुनिः, प्रो0 श्रवण कुमार शर्मा, प्रो0 अम्बुज कुमार शर्मा, प्रो0 एल0पी पुरोहितः, प्रो0 विनय विद्यालंकारः, प्रो0 प्रभात कुमारः, प्रो0 नवनीतः,

शेषभागःसप्तमपुटे

## अद्वितीयः संस्कृतप्रचारको विद्वान् आचार्यवासुदेवद्विवेदी शास्त्री

वाराणसी। आचार्यवासुदेवद्विवेदी शास्त्री अद्वितीयो मनीषी आसीद् इति निगदन्तः पद्मश्रिया विभूषिता महाकवयः पूर्वकुलपतिवरा अभिराजेन्द्रमिश्रा दूरभाषेणावदन् स्वविचारान् काव्यपाठमश्रावयन् काश्याम्। पूर्वकुलपतिः आचार्यराजारामशुक्लः पण्डितवासुदेवद्विवेदिशास्त्रिणं स्मारं स्मारं प्रस्तावमेकं सभामध्ये न्यगादीत् यत् अस्य मनीषिणः अयं पुण्यस्मृतिमहोत्सवः सदैव प्रतिवर्षम् आयोजनीयः। अस्मिन् अवसरे षण्णां सम्माननीयानां सम्मानः कृतः। अस्मिन् महोत्सवे पण्डिवासुदेवद्विवेदिग्रन्थावल्या यस्या नाम प्रसन्नभारतीति विद्यते। तस्याः बालसाहित्यविशेषांकाख्यः प्रथमो भागो लोकार्पितः। अस्य सम्पादनं महनीय आचार्यःडा. शरदिन्दुकुमारत्रिपाठी गुरुभक्तिपुरस्सरम् महता यत्नेन कृतवानस्ति। उत्तरप्रदेशसंस्कृतसंस्थानलखनऊ इत्यनेन अस्याः प्रकाशनं कृतमस्ति।



आचार्यकमलेशदत्तत्रिपाठी, आचार्ययुगलकिशोरमिश्रः, आचार्य- नागेन्द्रपाण्डेयः, स्वामिजगदीश्वरानन्दः, निदेशकः श्रीविनयश्रीवास्तवः,श्रीरामसागरदुबेप्रभृतयो महानुभावा विभिन्नैः सम्मानैः सम्मानिताः। पूर्वकुलपतिः आचार्यो गोपबन्धुमिश्रः वासुदेवद्विवेदिनः संस्कृतप्रचारस्य भूरिशः स्मरणं संस्कृतप्रचारसरणिमुन्नेतुम् प्रचारकान् प्रैरयत। विश्वनाथमन्दिरं निकषा विश्वविश्रुतस्य पण्डितप्रवरस्य वासुदेवद्विवेदिशास्त्रिणः एकोनविंशत्यधिकशततमे पुण्यस्मृतिमहोत्सवे संस्कृतज्ञानामभूत्समागमो यत्र प्रो. प्रो. नागेन्द्रपाण्डेयः, प्रो. हरिदत्तशर्मा, गोपबन्धुमिश्रः, कुलपतिः प्रो. हरेराम त्रिपाठी, प्रो. राजारामशुक्लः, प्रो. वैद्यनाथ मिश्रः, प्रो. सदाशिवकुमारद्विवेदी, प्रो. कृष्णकान्त शर्मा, प्रो. स्वरवन्दना, प्रो. हरिप्रसाद अधिकारी, प्रो. रामविनयसिंहः,डॉ. राजेन्द्र त्रिपाठी रसराजः, प्रो. उपेन्द्रपाण्डेयः, प्रो. विवेकपाण्डेयः, डॉ. शरदिन्दुकुमारत्रिपाठी, डॉ, सरोजकुमारपाण्डेयः, श्रीसन्तोषचतुर्वेदी, डॉ. प्रतापमिश्रः, डॉ. प्रदीपमिश्रः,सूर्यकान्त त्रिपाठी, डॉ. पवनपाण्डेयः, डॉ. फिरोजः, डॉ. प्रभात कुमारः, डॉ. सत्येन्द्र पाण्डेयः, डॉ. संजयचौबे डॉ. आशुतोष द्विवेदी, चन्द्रकान्तदत्तशुक्लः, डॉ. विमलेन्दुकुमारत्रिपाठी, डॉ. शम्भुत्रिपाठी प्रियो भागनेः शोधार्थी आयुष्मान् पतञ्जलिमिश्चान्ये सहृदयाः, एतेषु सोल्लासं केचिद्व्याख्यानं केचन मधुरं काव्यपाठं केचित् स्वोपस्थितिं च दत्त्वा महोत्सवमिमं सफलमकुर्वन्। डॉ. शैलेशकुमारतिवारी, डॉ. शशिकान्ततिवारी यान्त्रिकयुगे दूरभाषेणैव काव्यपाठमकुरुताम्। अनेके आचार्या अवदन् यत् संस्कृतस्य प्रचाराय यादृशो मार्गो गुरुणा वासुदेवद्विवेदिना निर्मितो वर्तते, तादृशो न केनापि अद्यावधि आविष्कृत इति। उत्तरप्रदेशसंस्कृतसंस्थानलखनऊ सार्वभौमसंस्कृतसंस्थानम, वाराणसी-उच्चतिब्बतीसंस्थानसारनाथप्रभृतिसौजन्येन काशीहिन्दूविश्वविद्यालयस्य वैदिकविज्ञानकेन्द्रे समायोजिते महति महोत्सवे भारतीयैकतासाधकं संस्कृतमिति गानं आराधनाद्याः बालिका अश्रावयन्। पाणिनिकन्यमहाविद्यालयस्य वैदिकच्छात्राभिः वैदिकं मङ्गलाचरणं प्रस्तुतम्। सुश्री प्रज्ञा तिवारी दण्डकपाठेन लौकिकमङ्गलाचरणं कृतवतीघ। कार्यक्रमस्य संयोजकः डॉ. अरविन्दकुमारतिवारी कविसम्मेलने महामनसं मालवीयं द्विवेदिवर्यं चोद्दिश्य पद्यमगायत। अस्मिन् महोत्सवे कलआसङ्कायवर्तिसंस्कृतविभागस्य शोधार्थिभिरेकपदे महान् सहयोगो विहितः।

अन्ते अन्तेवासिभिस्सह सर्वैरपि कृतकण्ठस्थैः संस्कृतज्ञैः आचार्यवासुदेवद्विवेदिनः संस्कृतप्रचारार्थं कुलगीतमिदम् अगायन्-

नगरे- नगरे ग्रामे-ग्रामे विलसतु संस्कृत-वाणी
सदने- सदने जनजनवदने जयतु चिरं कल्याणी।
सत्य-शील-सौन्दर्य-समीरा ज्ञान-जला गतिसारा
छलछलकलकल प्रवहतु दिशि दिशि पावनसंस्कृत-धारा॥
अमरवाणी विजयताम्।

# पाणिनिसंस्कृतविश्वविद्यालयस्य चतुर्थदीक्षान्तसमारोहःसुसम्पन्नः

(वार्तासंयोजकः डॉ. दिनेश चौबे)

उज्जयिनीस्थ महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य चतुर्थदीक्षान्तसमारोहः मेमासस्य चतुर्विंशतितमेदिनाङ्के बुधवासरे प्रातः एकादशवादने विक्रमकीर्तिमन्दिर-देवासमार्गपरिसरस्य सभागारे समायोजितःआसीत्। मध्यप्रदेशस्य राज्यपालः विश्वविद्यालयस्य कुलाधिपतयश्च माननीयः श्रीमङ्गुभाई




पटेलमहोदयः अवसरेऽस्मिन् सर्वान् शुभकामनाः प्रेषितवान् समारोहेऽस्मिन् मुख्यातिथिरूपेण मध्यप्रदेशस्य उच्चशिक्षामन्त्री डॉ. श्रीमोहनयादवमहोदयः, सारस्वतातिथिरूपेण भारतीयान्तरिक्षानुसंधानसङ्घठनम् ( इसरो) इत्यस्य प्रमुखः श्रीमंतः श्रीधरसोमनाथमहोदयः उपस्थितः आसीत्। विश्वविद्यालयस्य माननीयकुलपतिः आचार्यविजय कुमारसीजीमेनन्महोदयस्य आध्यक्षत्वे कार्यक्रमोऽयम् अभूत्। समारोहेस्मिन् उज्जयिनी सांसदः श्रीअनिलफिरोजियामहोदयः, उत्तरक्षेत्रस्य विधायकः श्रीपारसचन्द्रजैनमहोदयः, विश्वविद्यालयस्य कार्यपरिषद्-विद्यापरिषद् सदस्याः , विश्वविद्यालयस्य कुलसचिवः डॉ. दिलीपसोनीमहोदयाः उपस्थिताः आसन। समारोहस्य शुभारम्भः राष्ट्रगानेन, सरस्वतीवन्दनया, विश्वविद्यालयस्य कुलगानेन च जातम् । सारस्वतातिथिरूपेण विराजमानेन इसरो प्रमुखेण श्रीधरसोमनाथमहोदयेन उक्तम्-संस्कृतं न केवलं भाषा अपि तु ज्ञानविज्ञानस्य जननी।महर्षि पाणिनि महान् भाषावैज्ञानिकः आसीत् संस्कृतं ज्ञान-विज्ञानस्य भाषा अस्ति इयं भारतस्य आत्मा, आर्यभट्टः, भास्करः, सुश्रुतः, चरकादिदयः अनेकाः वैज्ञानिकाः भारते अभवन् इति अस्माकं गौरवम्। मुख्यातिथिरूपेण मध्यप्रदेशस्य उच्चशिक्षामन्त्री डॉ. मोहन यादवमहोदयः उक्तवान् यत् देशे प्राचीनज्ञानविज्ञानमहत्त्वाधारितम् शोधकार्यस्य आवश्यकता वर्तते । विश्वविद्यालयस्य नवीनप्रकल्पानां उच्चतमस्तरे उन्नयनाय, प्रचारप्रसाराय च वयं सङ्कल्पिताः स्मः। विश्वविद्यालयेन सह संस्कृतस्य संवर्धनम् अस्माकं कर्तव्यं शासनेन् सर्वविधसहयोगःकरिष्यते। कार्यक्रमे अध्यक्षरूपेण उपस्थितः विश्वविद्यालयस्य मान्यः कुलपतिः आचार्य विजयकुमारमेनन्महोदयेनोक्तं यत् संस्कृतं विज्ञानस्य भाषा विश्वविद्यालयः संस्कृतस्य विकासायप्रचारप्रसाराय च् कटिबद्धः अस्ति कुलपतिवर्येण वार्षिकं प्रतिवेदनं छात्रान् दीक्षान्त उपदेशं च दत्तवान् दीक्षान्तसमारोहे विक्रमविश्वविद्यालयस्य कुलपतिः डॉ. अखिलेश कुमारपाण्डेयमहोदयः, कुलसचिवः डॉ. प्रशान्तपौराणिकः, कुलानुशासकः आचार्यः शैलेन्द्रपाण्डेयमहोदयः कालिदाससंस्कृतआकादमी निदेशकः डॉ संतोषपंडया अन्ये गणमान्याः च समुपस्थिताः आसन् ।

संस्कृतविश्वविद्यालयेन विंशतिमहाविद्यालयाः सम्बद्धाः सन्ति । तेषु ९ शासकीयाः, ११ अशासकीयाः सन्ति । २०२१-२२ तमेसत्रे स्नातकस्नातकोत्तर पत्रोपाधिपरीक्षासु उत्तीर्णाः १३९७ छात्राः उपाधिं प्राप्तवन्तः। प्रावीण्यसूच्यां प्रथमद्वितीयतृतीयस्थानप्राप्तछात्राः स्वर्ण-रजत-कांस्यपदकैः सम्मानितो जाताः । एवञ्च विद्यावारिधिच्छात्राः अतिथिनां करकमलाभ्याम् उपाधिं प्राप्तवन्तः ।तत्र महर्षिपतञ्जलिसंस्कृतसंस्थानं भोपालं मध्यप्रदेशस्य अध्यक्षः आदरणीयः भरतबैरागीमहोदयः विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यविजयकुमारः सीजीवर्यः ;कुलसचिवः डॉ. दिलीपसोनीमहोदयः कार्यपरिषद् सदस्याः प्रमाणपत्रवितरणं कृतवन्तः । कार्यक्रमस्य सञ्चालनं विश्वविद्यालयस्य साहित्यविभाग प्रमुखेन डॉ. तुलसीदास परौहामहोदयेन कृतम् । समारोहे पाणिनिविश्वविद्यालयस्य-विक्रम विश्वविद्यालयस्य अध्यापकाःअधिकारिणः कर्मचारिणः पत्रकारवान्धवाश्च समुपस्थिताः आसन् आभारप्रदर्शनं कुलसचिवेन डॉ. दिलीपसोनीमहोदयेन कृतम् ।



# क्षिप्रायाः ऐतिहासिकं महत्त्वं , पुराणोक्त क्षिप्रा च व्याख्यानमाला सुसम्पन्ना

(वार्तासंयोजकः डॉ. दिनेश चौबे)

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयः, क्षिप्रालोकसंस्कृतिसमितिः, एवञ्च




विक्रमविश्वविद्यालयः उज्जयिनी, इत्येताषां संस्थानां संयुक्ततत्तावधाने द्विदिवसीयविद्वत्व्याख्यान मालायाः आयोजनं मेमासस्य पञ्चविंशतितमे दिनाङ्के शुक्रवासरे प्रातः एकादशवादने विक्रमकीर्तिमन्दिर-देवासमार्गपरिसरस्य सभागारे अभूत्। समारोहेऽस्मिन् मुख्यातिथिरूपेण मध्यप्रदेशस्य उच्चशिक्षामन्त्री डॉ.मोहनयादवमहोदयः,उपस्थितः आसीत् ।पाणिनिविश्वविद्यालयस्य माननीयकुलपतिः आचार्यविजय कुमारसीजीमेनन्महोदयस्य आध्यक्षत्वे कार्यक्रमोऽयम् अभूत्। समारोहेस्मिन् विक्रमविश्वविद्यालयस्य कुलपतिः आचार्यः अखिलेशकुमारपाण्डेयवर्यः कुलसचिवः डॉ.प्रशांतपौराणिकः उपस्थितौ आस्ताम्। समारोहस्य शुभारम्भः वैदिकमङ्गलाचरणेन दीपदीपनेन सरस्वतीवन्दनया, च सञ्जातः। मुख्यातिथिरूपेण विराजमानेन मन्त्रीमहोदयेन क्षिप्रायाः पौराणिकं महत्त्वं लोके तस्याः मान्यता एवञ्च सप्तसागराः-उपसागराः चतुरशीतिः महादेवाः तंत्रसाधनाया पुराकेन्द्रम् उज्जैनम् आसीत् इत्यादयाः बहवः अंशाः प्रतिपादिताः-कार्यक्रमे अध्यक्षरूपेण उपस्थितः विश्वविद्यालयस्य मान्यकुलपतिः आचार्य विजयकुमारमेनन्महोदयेनोक्तं यत् क्षिप्रानद्या वर्णनं सर्वत्र प्राप्यते पुराणेषु च विशेषतः उल्लिखितम् वर्तते। नदीनां संरक्षणं अस्माकं सामूहिकम् उत्तरदायित्वम् अस्ति। विक्रमविश्वविद्यालयस्य कुलपतिः डॉ. अखिलेशकुमारपाण्डेयमहोदयः, कुलसचिवः डॉ. प्रशान्तपौराणिकः, च सभां सम्बोधित त्वन्तौ मुख्यवक्तारूपेण डॉ.शुभम् शर्ममहोदयः पुराकालादारभ्य क्षिप्रायाः महिमा विषये विस्तारेण उक्तवान् । कार्यक्रमस्य सूत्रधारः डॉ रमण सोलङ्कीवर्यः आसीत । कार्यक्रमे नगरस्य गणमान्याः च समुपस्थिताः आसन् । कार्यक्रमस्य सञ्चालनं पाणिनिविश्वविद्यालयस्य योगविभागप्रमुखेण डॉ. उपेन्द्रभार्गवमहोदयेन कृतम्। समारोहे पाणिनिविश्वविद्यालयस्य- विक्रमविश्वविद्यालयस्य च् अध्यापकाःअधिकारिणः कर्मचारिणः पत्रकारवान्धवाश्च समुपस्थिताः आसन् आभारप्रदर्शनं पाणिनिविश्वविद्यालयस्य कुलसचिवेन डॉ. दिलीपसोनीमहोदयेन कृतम् ।कल्याणमन्त्रेण सह सभा समाप्ता जाता।

# काव्यशास्त्रविषये नवदिवसीयः शास्त्रप्रबोधनवर्गः सम्पन्नः

वार्ताहरः-डॉ. कञ्चन तिवारी

उत्तराखण्डः। संस्कृतभारती-उत्तराञ्चलद्वारा 15-05-2023 दिनाङ्कतः 23-05-2023 दिनाङ्कपर्यन्तं गूगलमीट इति अन्तर्जालीयपटलमाध्यमेन काव्यशास्त्रसम्प्रदायपरिचयः इति नाम्ना आयोजितस्य शास्त्रप्रबोधनवर्गस्य सम्पूर्तिकार्यक्रमः मई मासस्य 23 दिनाङ्के समभवत।विघ्नविघाताय डॉ. दिनेशपाण्डेयमहोदयेन मङ्गलाचरणं विहितम्। अतिथीनां परिचयपूर्वकं स्वागतं प्रान्तशिक्षणप्रमुखेण जगदीशचन्द्रजोशिमहोदयेन कृतम्। कार्यक्रमस्यास्य उद्घाटनं संस्कृतभारत्याः अखिलभारतीयसम्पर्कप्रमुखेण श्रीशदेवपुजारीमहोदयेन कृतमासीत्। तेन प्रोक्तं यत् संस्कृतस्य व्यापकरूपेण प्रचाराय प्रसाराय सम्भाषणकौशलवर्धनाय च एतादृशाः कार्यक्रमाः अत्यन्तमुपयोगिनो वर्तन्ते। सम्पूर्तिकार्यक्रमस्य मुख्यातिथिः संस्कृतभारत्याः अखिलभारतीयाध्यक्षः प्रोफेसर गोपबन्धु मिश्रमहोदयो विद्यते ।महोदयेन स्वकीये उद्बोधने संस्कृतसम्भाषणस्य लक्ष्यं शास्त्राध्ययनमेवास्तीति निगदितम् । तेन काव्यशास्त्रस्य सर्वेषां सम्प्रदायानां महत्त्वमस्तीति उक्त्वा तेषामध्ययनाय बलं प्रदत्तम् । अखिलभारतीयाध्यक्षेण इदमपि उक्तं यत् उत्तराञ्चल- संस्कृतभारतीपक्षतः एतादृक्कार्यक्रमाणां व्याख्यानादीनां संरक्षणं प्रकाशनं च विधेयम् । विशिष्टातिथिः विद्वत्परषदः उत्तराञ्चलप्रान्तसंयोजकः, कुलपतिः उत्तराखण्डसंस्कृत-विश्वविद्यालयस्य प्रोफे.दिनेशचन्द्रशास्त्रिमहोदयः स्वीये सम्बोधने वेदमूलकानां शास्त्राणां लोके सारल्येन प्रचाराय प्रसाराय काव्यशास्त्रस्य महतीमुपयोगितां रेखाङ्कितं करोति। वर्गसञ्चालकेन उत्तराखण्ड-संस्कृत-विश्वविद्यालय-हरिद्वारस्य सहायकाचार्येण डॉ. कञ्चनतिवारिमहोदयेन नवदिवसानां प्रतिवेदनं समुपस्थाप्य वर्गोद्देश्यं प्रकाश्यते।कार्यक्रमस्य आध्यक्ष्यं निर्वहति संस्कृतभारत्याः प्रान्ताध्यक्षा डॉ. जानकीत्रिपाठिमहोदया। त्रिपाठिमहोदयया समेषां कार्यकर्तृणां संस्कृतस्य प्रचारप्रसारादिदृष्ट्या शास्त्राध्ययनं प्रति अनुरागः प्रशंसितः। कार्यक्रमेऽस्मिन् प्रतिदिनं संस्कृतभारत्याः विशिष्टविद्वांस अतिथयः संयुताः भवन्तिस्म। कार्यक्रमस्य सञ्चालनं डॉ. प्रकाशचन्द्रजांगी-महोदयेन कृतम् ।कार्यक्रमे 75 तोऽधिकाः संस्कृतानुरागिणः जनाः प्रतिभागमगृह्णन् । येषु डॉ. राघवझाः, डॉ. मूलचन्द्र-शुक्लः ;डॉ.कुलदीपमैन्दोला,डॉ. चन्द्रप्रकाश उप्रेती,डॉ. भानुपाण्डेयः, डॉ. हेमन्तजोशी,डॉ. दामोदरपरगांई, डॉ. विमलेन्दुत्रिपाठी,डॉ. अभिषेककुमारः, संस्कृतभारत्याः नैके पदाधिकारिणः, कार्यकर्तारश्च ,पिपठिषवः जिज्ञासवश्च विद्यार्थिन इत्यादय उपस्थिता आसन् ।

# शारीरकविमर्श-विश्लेषणात्मिका राष्ट्रियासंगोष्ठी

डॉ॰ मणिशंकरद्विवेदी, नवदेहली

नवदेहलीस्थितेन श्रीशंकर-शिक्षायतनेन वैदिक-शोध-संस्थानेन, मई-मासस्य त्रिंशत्तमे दिनांके ब्रह्मविज्ञान-विमर्श-शृंखलायां शारीरकविमर्शमधिकृत्य एका अन्तर्जालीया राष्ट्रिया संगोष्ठी सम्पन्नतां गता। संगोष्ठीयं पण्डित-मधुसूदन-ओझा-प्रणीतस्य शारीरकविमर्श-नामकस्य ग्रन्थस्य आदितः पञ्चमप्रकरणपर्यन्तम् अधिकृत्य समायोजिता। अस्यां संगोष्ठ्यां पाण्डिचेरीस्थस्य



पाण्डिचेरीविश्वविद्यालयस्य, संस्कृतविभागस्य आचार्या: प्रो. के. ई. धरणीधरणमहोदया: मुख्यवक्तार: आसन् तथा अन्यवक्तृषु तिरुपतिस्थस्य राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य अद्वैतवेदान्तविभागस्य आचार्या: प्रो. के. गणपति-भट्ट महोदया:, नवदेहलीस्थस्य श्रीलाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य न्यायविभागस्य सहाचार्या: डॉ. रामचन्द्रशर्माण: तथा नवदेहलीस्थस्य इन्दिरा-गाँधि-मुक्त-विश्वविद्यालयस्य संस्कृतविभागस्य सहाचार्या: डॉ. देवेश-कुमार-मिश्रा: प्रमुखा: आसन्। इयं संगोष्ठी श्रीशंकरशिक्षायतनस्य समन्वयकानां तथा संस्कृत-प्राच्यविद्याध्ययन-संस्थानस्य, जवाहरलाल-नेहरू-विश्वविद्यालयस्य आचार्याणां प्रो. सन्तोष-कुमार-शुक्ल-महाभागानाम् आध्यक्ष्ये सुसम्पन्ना जाता।

पण्डित-मधुसूदन-ओझा-प्रणीत: शारीरकविर्मश: वेदान्तदर्शनस्य अत्यन्तं महत्त्वपूर्ण: मौलिकश्च ग्रन्थ: विद्यते। ग्रन्थेऽस्मिन् षोडश प्रकरणानि समुपलभ्यन्ते। ग्रन्थस्यास्य प्रथमं, द्वितीयं, तृतीयं, पञ्चमं प्रकरणम् स्वीकृत्य वक्तार: व्याख्यानं प्रददु:।

प्रो. के. ई. धरणीधरणमहोदया: ब्रह्म-मीमांसा-प्रवृत्तिनिमित्तं नामकं प्रथमं प्रकरणम् उररीकृत्य स्वकीयं व्याख्यानं प्रदत्तवन्त:। सृष्टिकारकस्य प्रत्येकं तत्त्वस्य विचारक्रमे तै: भणितं यत् इयं सृष्टि: वाक्तत्त्वत: समुद्भूता, सिद्धान्तोऽयं व्याकरणदर्शने समुपलभ्यते। श्रुतौ 'वागेव विश्वा भुवनानि जज्ञे' वाक्यमिदं विद्यते। विश्वस्य सृष्टौ ब्रह्म मूलकारणम् अस्ति। तद् ब्रह्म तत्त्वम् एकम् अथवा अनेकम्। अस्मिन् विषये विचारक्रमे ग्रन्थकारा: पं. ओझावर्या: लिखन्ति यत् सृष्टे: प्राक् ब्रह्म तत्त्वम् एकम् एव आसीत्। ('ब्रह्म वा इदमग्र आसीत् एकमेव', बृहदारण्यक उपनिषद् १.४.१०) ब्रह्म तत्त्वम् एकम् न अनेकम् अस्ति। 'तथा चेदं ब्रह्मैकमेवेति सिद्धान्त:।' (शारीरकविमर्श:, पृ.१०, हिन्दी-अनुवाद-संस्करणम्)

प्रो. के. गणपतिभट्ट-महोदया: स्वव्याख्याने ग्रन्थकारस्य पं.ओझावर्यस्य ब्रह्मण: द्विविभागस्य प्रतिपादनम् अकुर्वन्। एकम् आत्मब्रह्म अपरं च शास्त्रब्रह्म। ग्रन्थकार: पं. ओझावर्य: बृहदारण्यकोपनिषद: आधारेण आत्मन: त्रिधा स्वरूपं स्वीकृतवान्। स आत्मा वाङ्मय: प्राणमय: मनोमय: विद्यते। अनेन त्रिधा विभागेन आत्मन: त्रिभावस्य विविधानि रूपाणि सुगुंफितानि सन्ति। आत्मन: भावत्रयम् अस्ति- शान्तभाव: वीरभाव: पशुभावश्च । आत्मा त्रितन्त्रात्मक:। आत्मन: स्वरूपाणि सन्ति – ज्ञानम्, कर्म अर्थश्च। अस्य त्रितन्त्रस्य द्योतक: त्रिवीर्यम् अस्ति। आत्मन: त्रिवीर्यम् अस्ति- ब्रह्म, क्षत्रम् विट् च। ब्रह्मवीर्यं ज्ञानस्य लाभस्य साधनं प्रतिभा उत तेजो वा तद् एव ब्रह्मवीर्यम् अस्ति। 'तत्र ज्ञानोदयौपयिकं वर्चोलक्षणं ब्रह्मवीर्यम्।'( तत्रैव, पृ. २७) कर्मण: प्राप्ति: उत्साहेन भवति। अयम् उत्साह: क्षत्रवीर्यम् अस्ति। धनस्य प्राप्ति: संग्रहेण भवति, अयं संग्रह: वीड्वीर्यम् अस्ति- "कर्मोदयौपयिकम्युत्साहलक्षणं क्षत्रवीर्यम्,

वित्तसंचयौपयिकं संग्रहलक्षणं विड्वीर्यम्।" (तत्रैव)

शारीरकविमर्शस्य तृतीय-प्रकरणस्य नाम वेदतत्त्वनिरुक्ति: अस्ति । प्रकरणमिदधिकृत्य डॉ. रामचन्द्रशर्मा अकथयत् यत् वाक्तत्त्वेन सृष्टि: समुत्पद्यते। वाक्तत्त्वं सर्वदा मनसा प्राणेन च युक्तं भवति। सत्य-स्वरूपा वाक् (ऋग्वेद:, यजुर्वेद: सामवेदश्च) वेदोऽस्ति। एते वेदा: आत्मन: महिमान: सन्ति। इयं संपूर्णा सृष्टि: ब्रह्म एव अस्ति। (सर्वं खल्विदं ब्रह्म)। प्रजापति: विश्वस्य त्रिधा विभागं कृतवान्- ज्ञानम्, क्रिया अर्थश्च।

ज्ञानस्य त्रीणि रूपाणि सन्ति- आनन्द: विज्ञानं मनश्च। अस्य ज्ञानस्य य: प्रधान-पुरुष: अस्ति, स एव चिदात्मा । अस्य चिदात्मन: महिमा मनोमय: वेद: अस्ति। कर्मण: त्रीणि रूपाणि सन्ति-मन: प्राण: वाक् च। कर्मण: प्रधानपुरुष: कर्मात्मा अस्ति। कर्मात्मन: महिमा प्राणमय: वेद: अस्ति। अर्थस्य त्रीणि रूपाणि सन्ति-वाक्, अप् अग्निश्च । अस्य कर्मण: य: प्रधानपुरुष:, स एव भूतात्मा अस्ति। अस्य भूतात्मन: महिमा वाङ्मय: वेद: अस्ति। 'त्रयी वा एष विद्या तपति' अस्या: श्रुते: वाक्यस्य अभिनवा व्याख्या अत्र अस्माभि: दृश्यते।

शारीरकविमर्शस्य वेदशाखाविभागनामके पञ्चम-प्रकरणे वेदस्य विविधा: शाखा: वर्णिता: विद्यन्ते। विज्ञानवेद: शास्त्रवेद: च द्वौ समानौ विभक्तौ स्त:। अनेन विभागेन वेदस्य एकत्रिंशदुत्तरैकैकशताधिकसहस्रम् शाखा: । इदं प्रकरणमधिकृत्य व्याख्यानं कुर्वन् डॉ. देवेशकुमारमिश्र: कथितवान् यत् वैदिकविज्ञाने ऋतं सत्यं चेति द्वे तत्त्वे सृष्टिप्रतिपादकतत्त्वरूपेण स्वीकृते स्त:। ऋतस्य अर्थ: शून्यम्, सत्यस्य अर्थ: पूर्ण: भवति। आप: (जलम्) तत्त्वम् ऋतम्, अग्नितत्त्वञ्च सत्यम् अस्ति। जलं सत्यस्वरूपे अग्नौ गर्भं सुरक्षितं करोति। तस्य अग्ने: गर्भे स्थितस्य जलतत्त्वस्य विकास: सञ्जायते। ये विकासा: षट् प्रकारेण भवन्ति। पूर्वदिक् शून्यस्य द्योतिका अस्ति, चतुर्दिशि दश सूर्यस्य तेज: अस्ति, एते दश पुन: दशधा गुणितो भूत्वा शतं भवति, शतं सूर्यस्य तेज: विद्यते। पुन: शतं दशधा गुणितो भूत्वा सहस्रं भवति, सहस्रं सूर्यस्य तेज: अस्ति। सूर्यमण्डलस्य सहस्रं स्वरूपाणि जायन्ते। शारीरकविमर्शस्य प्रकरणेऽस्मिन् गणनाया: अनेकानि रूपाणि ग्रन्थकारै: समुद्घाटितानि।

स्वकीये अध्यक्षीये उद्बोधने प्रो. सन्तोष-कुमार-शुक्ल-वर्या: अस्या: संगोष्ठ्या: साफल्यं स्वीकुर्वन्त: अकथयन् यत् सर्वै: विद्वद्भि: वक्तृभि: स्वनिर्धारिते विषये शारीरकविमर्शस्य अनेकानि विषयानि स्पष्टतया अस्माकं पुरत: उद्घाटितानि। अस्मिन् क्रमे तै: शारीरकविमर्शस्य पञ्चमे प्रकरणे वेदशाखाविभागस्यान्तर्गते सहस्र-शब्दे स्वविचार: प्रदत्त:। तै: प्रतिपादितं यत् पं. ओझावर्याणां मते सहस्रं लोकस्य वेदस्य वाच: च द्योतकम् अस्ति। इन्द्र: विष्णुश्च परस्परं प्रतिस्पर्धासमये इमानि तत्त्वानि विकसितानि।

संगोष्ठ्या: शुभारम्भ: श्रीगोयनका-वेद-विद्यालयस्य वेदाचार्यस्य श्रीसन्दीप-कुमार-द्विवेदिन: वैदिक-मङ्गलाचरणेन जात: समापनञ्च वैदिकशान्तिपाठेन अभूत्। संगोष्ठ्या: सञ्चालनं श्रीशंकरशिक्षायतन-वैदिकशोधसंस्थानस्य शोधाधिकारिणा डॉ. मणि शंकर द्विवेदिना तथा धन्यवाद-ज्ञापनं डॉ.लक्ष्मी-कान्त-विमलेन कृतम्। देशस्य विविधेभ्य: विश्वविद्यालयेभ्य:, महाविद्यालयेभ्य: अन्य-शैक्षणिक-संस्थानेभ्यश्च शताधिका: विद्वांस: शोधच्छात्रा: अस्या: विद्याया: जिज्ञासवश्च स्वकीयेन सहभागित्वेन अस्या: संगोष्ठ्या: अत्यन्तं सफलं चक्रु:।


## महर्षिवाल्मीकिसंस्कृतविश्वविद्यालय:

Maharshi Valmiki Sanskrit University
(Established by Haryana Legislative Act U/S 20/2018)
Kaithal – 136027 (HARYANA)

क्रमाङ्क: /S.No. :mvw/Aca/1831 दिनाङ्क: Date 23/05/2023

**प्रवेश सूचना**

**प्रवेश हेतु रजिस्ट्रेशन 01/06/2023 से 30/06/2023 तक**

| पाठ्यक्रम | विषय | योग्यता | अवधि | शुल्क | सम्पर्कसूत्र |
|---|---|---|---|---|---|
| शास्त्री (बी.ए.) बी.ए. (NEP 2020 के अनुसार) | व्याकरण, साहित्य, दर्शन, योग, ज्योतिष, वेद, धर्मशास्त्र योग | 10+2 समकक्ष | चार वर्षीय | 2500/– प्रतिवर्ष | 9315417281 |
| आचार्य (एम.ए.) एम.ए. | वेद, व्याकरण, ज्योतिष, साहित्य, दर्शन, धर्मशास्त्र हिन्दू अध्ययन, योग | शास्त्री/B.A. समकक्ष | द्विवर्षीय | 2630/– प्रतिवर्ष | |
| डिप्लोमा कोर्स | ज्योतिष, वेद, पौरोहित्य कर्मकाण्ड, वैदिकगणित, वास्तुशास्त्र, संस्कृतभाषादक्षता, योग | 10+2 समकक्ष | एकवर्षीय | 6000/– प्रतिवर्ष | |
| | आयुर्वेद | 10+2 समकक्ष | द्विवर्षीय | 10000/– प्रतिवर्ष | |

विश्वविद्यालय के विभिन्न पाठ्यक्रमों में प्रवेश लेने के इच्छुक विद्यार्थी विश्वविद्यालय की आधिकारिक वैबसाईट पर जाकर अपना पञ्जीकरण करवा सकते हैं। पञ्जीकरण के उपरांत विश्वविद्यालय के नियमानुसार अर्ह (योग्य) विद्यार्थी ही विश्वविद्यालय के विभिन्न पाठ्यक्रमों में प्रवेश लेने के पात्र होगें। नवीनतम एवं प्रवेश सम्वन्धित जानकारी के लिए विद्यार्थी विश्वविद्यालय की आधिकारिक वैबसाइट www.mvsu.ac.in का अवलोकन करते रहें।

-Sd-
कुलसचिव





# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

प्रधानमंत्री नरेंद्रमोदी नूतन संसद भवनस्य उद्घाटनात् पूर्वं सेंगोलदण्डस्य स्थापना द्वारा एकां ऐतिहासिक परंपरां पुनर्जीविताम् अकरोत्। वस्तुतः सैंगोल शब्दस्य उत्पत्तिः तमिल भाषायाः ष्सेम्मईष्शब्दात् जाता, यस्यार्थः धर्मः,सत्यं निष्ठा च। सेंगोल स्वतंत्रता प्राप्तौ 14 अगस्त 1947 तमे दिनांके तमिलनाडु निवासिनः तत्कालीनाय प्रधानमंत्रिणे जवाहरलाल नेहरू वर्याय समर्पितः सौ। सेंगोल एकः राजदंडः, यस्य प्रयोगः चोल साम्राज्ये नूतनाय उत्तराधिकारिणे सत्ता हस्तांतरणाय गृह्यते स्म स भारतीय शास्त्रीय भरतनाट्यम नर्तकी पद्मा सुब्रमण्यम् संस्कृति मंत्रालयाय पत्रेण सैंगोलदंडं नूतन संसद भवने स्थापयितुं परामृष्टवती। ततः संस्कृति मंत्रालयः शोध परक तथ्येभ्यः परं संसदः अंशं स्थापयितुं निर्णीतवान्। इत्थं केंद्रीय गृह मंत्री अमित शाहः सेंगोल प्रथा पुनः आरब्धुं घोषणया सह उक्तवान् यत् शक्ति प्रतीकः तमिलनाडुसाधवः प्रधानमंत्रिणे समर्पयिष्यते, यस्य स्थापना लोकसभा भवने लोकसभाध्यक्षस्य आसन समीपे करिष्यते सततः पूर्वं सैंगोलदण्डः प्रयागराजस्य नेहरू संग्रहालये सुरक्षितः आसीत् रश। वास्तविकतया सैंगोल स्थापनायै संसद भवनम् अधिक उपयुक्तं पवित्र स्थानं च, यः शताब्दिपर्यन्तं भारतीय संस्कृतिं जीवितां स्थापयितुं सहायकः भविष्यति।

भवदीया

सम्पादिका

## ॥ वेद वाणी ॥

श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर ।
वसो पुरुस्पृहं रयिम् ।।
मा नो अरातिरीशत देवस्य मर्त्यस्य च ।
पर्षि तस्या उत द्विषः ।।
विश्वा उत त्वया वयं धारा उदन्या इव ।
अति गाहेमहि द्विषः ।।

O! Mighty Agni Deva ( ( Lord of Fire)"You rule all and look after their welfare. You are the greatest and most resplendent of all of divinities, grant us various kinds of desired wealth in abundance."“May no enemy whether of gods or men ever rule us.May you also protect us from such enemies. "May we, through Your favour, overwhelm, overcome and cross , like a flooded water gushing forth, all those enemies that hate us.'

The Rig Veda 2.7.1/2/3

'न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ।।
या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः ।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्स्याम।।

'Man is very ignorant and weak.He can't know what things lie to his right or left, in front or back. He also does not know what the right path is or the wrong one. He, should therefore, walk in the path shown by Gods and the wise and find the eternal light of wisdom."O! Revered Adityas! The bonds and illusion created by You ensnare the enemies that harm us. Sitting in a chariot, we cross all these obstructions, just as a seasoned horseman overcomes all difficult obstacles. Protected thus, we become unharmed and live in our large and happy homes.'

The Rig Veda 2.27.11/16

**संकलन : एस.वासुदेव रावः**


## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**


# 'वृद्धिरादैच्' इति सूत्रस्य स्वारस्यम्

डॉ.वीरेन्द्र कुमार ठाकुरः
सहायकाचार्यः (व्याकरणम्)

ननु पाणिनीयव्याकरणे षड्विधं सूत्रं स्वीकृतमस्ति । तद्यथा-

**'संज्ञा च परिभाषा च विधिर्नियम एव च ।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥'**

एतेषु षड्विधेषु सूत्रेषु विधिसूत्रं शब्दानुशासनस्य प्रक्रियां पूरयति, तस्मात् कारणात्सूत्रमिदं मुख्यं मन्यते। शिष्टानि पंचविधानि सूत्राणि विधिसूत्रोपकारकाणि भवन्ति । अर्थात् शब्दानुशासने तु मुख्यरूपेण विधि सूत्रमेव प्रसिद्धम्, परञ्च विधिसूत्राणामर्थावबोधनाय तदतिरिक्तानि पंचविधानि सूत्राणि उपयुज्यन्ते। अपरत्र कथयितुं शक्यते यद्विधिसूत्रस्य अर्थोद्घाटनाय संज्ञादिपंचविधानां सूत्राणामुपयोगः क्रियते। परिस्थितावस्यां कोऽप्याचार्यः स्यात्, सः स्वकीयव्याकरणशास्त्रस्य प्रारम्भे विधिसूत्रापेक्षया तदतिरिक्तानि विधिसूत्रस्य सहायक-सूत्राणि एवोपस्थापयितुमिष्यते । अस्या एव स्वाभाविकप्रक्रियायाः अनुसरणं कुर्वन् पाणिनिरपि संज्ञासूत्रेण स्वकीयं व्याकरणं प्रारभत। तत्र सर्वप्रथमं 'वृद्धिरादैच्'(1) इति सूत्रमुपस्थापितम्।

यदि संज्ञासूत्रं भवति तत्र न्यूनातिन्यूनं द्वे पदे भवत एव । तयोर्द्वयोः पदयोः एकं पदं संज्ञि अपरं च संज्ञापदं भवति। संज्ञा - संज्ञीति पदद्वयं विना कस्यापि संज्ञासूत्रस्य परिकल्पना न कर्तुं शक्यते । कोऽप्याचार्यः किमपि शास्त्रञ्च स्यात्, यदि संज्ञासूत्रस्य परिकल्पना कर्त्तव्या चेत्तर्हि अनिवार्यरूपेण संज्ञासंज्ञीत्यनयोः द्वयोः पदयोः परिकल्पना नूनमेव करणीया भविष्यति । एषा हि स्वाभाविकी प्रक्रिया विद्यते । तेनैव भगवान् पाणिनिरपि अस्याः एव स्वाभाविकप्रक्रियायाः अनुसरणं स्वकीयव्याकरणशास्त्रेऽपि कृतवान् ।

संज्ञासूत्रेषु आवश्यकयोः संज्ञासंज्ञीति पदद्वयोः क्रमस्यापि एकः स्वाभाविको नियमो भवति । तेन स्वाभाविकनियमानुसारेण प्रथमं संज्ञीतिपदस्य तदनन्तरञ्च संज्ञेति पदस्य प्रयोगो भवति । यतो हि न संज्ञिपदम् उद्देश्यं भवति, संज्ञापदं च विधेयम् । अत **'उद्देश्यमनुक्त्वा नहि विधेयमुदीरयेदिति'** सिद्धान्तानुसारेण प्रथमं संज्ञीतिपदस्य ततो विधेयपदस्य प्रयोग उचितः । सांसारिकव्यवहारेऽपि अस्यैव क्रमस्यानुभवः कर्तुं शक्यते । यथा- कस्यापि संज्ञिभूतपदार्थस्य प्रथमा सत्ता भवति, तदनन्तरञ्च तस्य संज्ञाकरणस्योपक्रमः क्रियते। प्रथमं तावद् बालकस्य (संज्ञिनः) अस्तित्वं भवति तत्पश्चात् तन्नाम्नः (संज्ञायाः) अस्तित्वम्। अनयैव स्वाभाविकरीत्या संज्ञासूत्रेऽपि प्रथमं संज्ञिपदस्यानन्तरञ्च संज्ञापदस्य स्थानं मान्यमवतिष्ठते। परं भगवान् पाणिनिः **'वृद्धिरादैच्'** इति सूत्रे स्वाभाविकरीत्या निध ारितक्रमस्यानुसरणमकृत्वा तद्विपरीतं क्रममुपस्थापितवान्। तत्र प्रथमं वृद्धिरिति संज्ञापदं ततश्च आदैजिति संज्ञिपदं स्थापितवान् । एवंहि महर्षिपाणिनिः **'वृद्धिरादैच्'** इति सूत्रसंरचनायाम् उपर्युक्तासु तिसृषु स्वाभाविकरीतिषु प्रथमद्वयोः रीत्योरनुसरणं कृतवान् । परञ्च तृतीयायाः स्वाभाविकरीत्याः अनुसरणं कथं न कृतवान् इति विचारणीयो वर्तते ।

पाणिनीयपरम्परायां **'वृद्धिरादैजि'** ति सूत्रसंरचनाविषये सर्वप्रथमं भाष्यकारेण भगवता पतञ्जलिना विचारः कृतः। तद्यथा-(2) **'एतदेकमाचार्यस्य मंगलार्थे मृष्यताम् । मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति, आयुष्मत्पुरुषाणि च। अध्येतारश्च वृद्धियुक्ता यथा स्युरि'**ति । अर्थात् भगवतः पाणिनेराचार्यस्य आचारोऽयं मंगलार्थो वर्तते, इति ज्ञेयम् । मांगलिक आचार्यः महतः शास्त्रसमूहस्य मंगलाय वृद्धिशब्दमादौ प्रयुक्तवान्। यानि मंगलादिशास्त्राणि भवन्ति तेषामेव विस्तारो भवति, तस्याध्येतारो वीरपुरुषाः, आयुष्मन्तश्च भवन्ति। (प्रस्तुते प्रसंगे वृद्धिशब्देन क्रियमाणे मंगलाचरणे) अस्य शास्त्रस्य अध्येतारः वृद्धया युक्ताः स्युः एवंविधस्य मंगलस्य कामना कृता विद्यते। अर्थात् मंगलार्थं वृद्धिशब्दः प्रथमक्रमे स्थापितः । अत्रैव कैयटेनोक्तं यदत्र मंगलसिद्ध्यर्थम् (संज्ञा-संज्ञीति एवंविधस्य) अन्यथाक्रमः स्थापितः । स्वाभाविकरूपेण चार्थस्य (सूत्रार्थस्य) सिद्धये तु (संज्ञिसंज्ञेति एवंविध स्य) अन्यथा क्रमः स्वीक्रियते । तद्यथा-(3) **'इह तु मंगलार्थोऽन्यथा पाठक्रमः । आर्थस्त्वन्यथा क्रमः'** इति। भाष्यकारस्य उपर्युक्तवचनस्यानुसरणमेव अग्रिमायां सम्पूर्णव्याकरणपरम्परायां प्रायः अयमेवाभिप्रायः पुनरुक्तः कृतो दृश्यते। अर्थात् पाणिनीयव्याकरणपरम्परायाः सर्वे आचार्याः **'वृद्धिरादैजि'**ति संज्ञासूत्रे पदक्रम-परिवर्तनस्य एकमात्रं कारणं मंगलार्थं स्वीकृतवन्तः ।

भगवतः पाणिनेराचार्यस्य मनसि कीदृशी मंगलकामना आसीदिति उद्घाटयन् महर्षिः भगवान् पतंजलिः कथयति यत्- **'अध्येतारश्च वृद्धियुक्ता यथा स्युरिति'** । अर्थात् शास्त्रस्यास्य अध्येतारः वृद्धियुक्ताः भवेयुरिति ।

मानवानां मनसि जायमानासु अनेकासु कामनासु एका कामना वृद्धेरपि भवति। अतो भाष्यकारस्य वचनोपरि कस्याः अपि शंकाया, कस्यापि प्रश्नस्य कारणं नोचितम् । परञ्च अस्याः वृद्धेः कामनायाः आचार्यपाणिनिपरिकल्पितं क्षेत्रं किमस्ति ? किं पाणिनेराचार्यस्य मनसि - (1) शारीरिकी, मानसिकी आत्मिकी वा वृद्धिरपेक्षिता?, (2) धनयशः पदप्रतिष्ठासुखवैभवप्रभृतीनां वृद्धिरपेक्षिता?, (3) जन्ममरणचक्रान्मुक्तिरूपबुद्धौ वृद्धिरपेक्षिता?, एवंहि अन्याः अपि परिकल्पनाः मनसि समायान्ति । अत्र तात्पर्यं वर्तते यदासु विविध सम्भावित-वृद्धिषु का वृद्धिः सूत्रकारैरभिप्रेता अस्तीति प्रश्न : विद्यते। अस्य प्रश्नस्य निश्चयात्मकम् उत्तरमन्वेषणीयमस्ति । अन्यथा मंगलरूपे अध्येतघ्णां वृद्धिः स्यादिति भाष्यकारस्य कथनं मात्रमेकमौपचारिकं भविष्यति। पाणिनीय-व्याकरणपरम्परायामस्य कुत्रापि स्पष्टरूपेणोत्तरं न दृश्यते । न ह्येतावदेव इदानीं यावत् कुत्रापि न त्वेतादृशी जिज्ञासा जागृता कृता, न हि जिज्ञासां मनसि निधाय सम्भावितसमाधानरूपे किमपि कुत्रापि उक्तमित्यनुमीयते। समग्रपरम्परायामेतस्मिन् सन्दर्भे सर्वथा मूकं दृश्यते। सामान्यरूपेण यदि उपर्युक्तजिज्ञासायाः समाधानं कुर्मः चेत्तर्हि कथयितुं शक्यते यदस्य शास्त्रस्य अध्ययनाध्यापकानां सार्वत्रिकी वृद्धिः स्यात्, एतादृशी मंगलकामना एनं वृद्धिपदमादौ उच्चार्य पाणिनिना व्यक्तीकृता।

एकत्र स्वाभाविकं समाधानं मनसि आयाति । आचार्यपाणिनिरष्टाध्याय्या रचयिता अस्ति। रचयितारं स्वकीयां रचनां प्रति रागः स्वाभाविक एव । शास्त्रकाररूपे शास्त्ररचयितुर्मनसि अस्य रागस्य किं स्वरूपं भवितुमर्हतीति कल्पनातीव सरला विद्यते । स्वशास्त्रं दृष्टिसमक्षमुपस्थाप्य शास्त्रकारस्य मनः अध्ययनाध्यापनख्र कर्तघ्णां गुरुशिष्याणां स्वशास्त्रीयविषयपरिज्ञाने सततं वृद्धिर्भवेदिति भावनायाः अतिरिक्तमपरं चिन्तनं किं भवितु- मर्हति। अनयैव मनोनिहितकामनया भगवान् पाणिनिः स्वशब्दानुशासनस्य प्रथमसूत्रे वृद्धिरिति पदस्य प्रथम- प्रयोगः कृतवान्। यद्यपि समाधानमेतत् सन्तोषजनकमस्ति, तथापि आचार्यपाणिनिः यादृश्याः सुतीक्ष्णमेधायाः स्वामी आसीत्, सा मेधा केवलमौपचारिकी स्यादेवं न भवितुमर्हति । एतत्प्रकारकमंगलाचरणन्तु कोऽपि कर्तुं शक्नोति। पाणिनेर्मनसि अवश्यमेव किमपि विशिष्टं भवेत्। पाणिनेरस्मिन् व्यवहारे (वृद्धिशब्दस्यादौ स्थापने) यासां महत्त्वपूर्णानां सूचनानां संकेतः प्राप्तः, तासां विदुषां विचाराय सन्तोषाय च प्रस्तूयते-पाणिनेराचार्यस्य सूचनानामनुभवः प्रत्येकमध्येतघ्णां भवति । परञ्च 'वृद्धिरादैच्' इति सूत्रे पदक्रम- परिवर्तनेन आचार्यः स्वयमेव एतदाशयं कथयति -(4) **'महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्ये'**ति। अनेन वचनेन पाणिनेराचार्यस्य यां प्रखरमेधां प्रति इंगितं करोति, तत्प्रमाणस्वरूपेऽपि इमं क्रमपरिवर्तनव्यवहारं समायोजनं कर्तुं शक्यते ।

**'वृद्धिरादैच्' इति सूत्रे प्रयुक्तवृद्धिशब्दस्य निम्नानुसारेण पञ्च अर्थाः भवन्ति-**

1. मांगलिकपदत्वेन वृद्धिः - अर्थात् सार्वत्रिक संवर्धनम्।
2. संज्ञाशब्दत्वेन वृद्धिः - अर्थात् व्याकरणस्यैका संज्ञा उत वा एकः पारिभाषिकः शब्दः ।
3. प्रतीकशब्दत्वेन वृद्धिः - अर्थात् व्याकरणस्य सर्वासां संज्ञानां प्रतीकशब्दः (एतेन प्रतीकार्थकेनास्य पदस्य उच्चारणेन सहैव समासां संज्ञानां प्रतीतिर्भवति) ।

एषां त्रयाणामर्थानां स्वारस्यं भवति यद् - मांगलिकपदत्वेन यो वृद्धिशब्दः स सार्वत्रिकसंवर्धनरूप- मंगलसूचक इति पतञ्जलिना मान्यः । अपरञ्च यत्संज्ञाशब्दत्वेन वृद्धिपदं तत्संज्ञाशब्दस्य (किं वा पारिभाषिक-शब्दस्य) स्वरूपे वर्तते। एनं संज्ञाशब्दं मनसि निधाय **'वृद्धिरादैच्'** इति सूत्रस्यार्थः सम्पद्यते, एतच्च वृत्तिकारैः मन्यते। तृतीयश्च प्रतीकशब्दत्वेन यो वृद्धिशब्दः सः समासां संज्ञानां प्रतीकरूपेण विद्यते । एतेन प्रतीकार्थकेन अस्य पदस्योच्चारणेन सहैव सर्वासां संज्ञानां प्रतीतिर्भवति। प्रतीतिरियं संकेतयति यद् यद्यपि व्याकरणे षड्विधानि सूत्राणि सन्ति, तथापि प्रथमं स्थानं संज्ञासूत्राणामेवेति। अर्थात् विध्यादिसूत्राणाम् अर्थघटनोपक्रमे सर्वप्रथमं संज्ञासूत्राणामुपयोगो भवति। संज्ञासूत्राणामुपयोगं विना अन्येषां पञ्चविध - सूत्राणामर्थस्य परिज्ञानं न भवति। एवंहि तृतीयो वृद्धिशब्दः अष्टाध्याय्याः सर्वासां संज्ञानां सूचकोऽस्ति ।

4. चतुर्थविधः वृद्धिशब्दः व्युत्पन्नशब्दत्वेनास्ति, तथा च - वर्धनमिति सा वृद्धिः । अर्थात् वर्धनक्रिया कस्यचिद् वस्तुनः सूचका भवति। पाणिनिना हि **'वृद्धिरादैच्'** इति सूत्रे संज्ञासंज्ञीति पदयोः व्युत्क्रमं कृत्वा यद् वृद्धिपदं प्रथमे स्थाने स्थापितम्, तदष्टाध्यायीति ग्रन्थस्य वर्धितायाः पाठ्यसामग्र्याः सूचनां ददाति ।

सुविदितमस्ति यद् व्याकरणपरम्परायां प्रचलिताष्टाध्याय्याः पठनपाठनपद्धतौ सर्वप्रथमं सूत्रार्थस्य विचारः क्रियते। सूत्रार्थेऽस्मिन् विचारे पदच्छेदः पदपरिचयश्च, सूत्रस्थप्रयुक्तपदे विहितसमासपरिचयः, अनुवृत्तेः परिज्ञानं कुर्वन्, अन्ते च सूत्रार्थं यावद् गमनं भवति । एवमेव वारमेकं सूत्रार्थस्य परिज्ञाने जाते सति, द्वितीय- सोपानरूपे तत्तत् सूत्रै कस्मिन् पदे (उदाहरणे लक्ष्ये वा) केन प्रकारेण सूत्रमिदं कार्यं करोति, एतदपि ज्ञातव्यं भवति। एतदर्थम् उदाहरणस्यापि विचारः क्रियते । व्याकरणशास्त्रे एषामुदाहरणानामपि द्विविधं रूपं भवति। तत्र एकस्मिन् रूपे तु मात्रममुकसूत्रेण कस्यां परिस्थितौ किं कार्य सम्पाद्यते इत्येव विचारो भवति। अपरत्र समग्र-रूपसिद्धिप्रक्रियायाः विचारो भवति । सारतस्तु अष्टाध्याय्याः पठनपाठनपद्धतौ पंच सोपानानि सन्ति, तानि सोपानानि सूत्रेणैतेन ज्ञापितेन भवन्ति, सूत्रं ज्ञायते। परञ्च केवलं सूत्रार्थज्ञानेनैव कार्यं न भविष्यति, अपितु एतदतिरिक्तमपि ज्ञातव्यमावश्यकं भवति, तदस्ति रूपसिद्धिप्रक्रिया। रूपसिद्धिप्रक्रियां विना व्याकरणाध्ययनकार्यं न्यूनमेव भवति।

सामान्यतः संस्कृतसाहित्यस्य रघुवंशादिपाठकः शिष्यसम्प्रदायः रघुवंशादिगतपद्यानामर्थानां ग्रहणं कृत्वा स्वकीयं पठनं समापयति, तद्वदेव व्याकरणशास्त्रपाठकः शिष्यसमुदायः सूत्रार्थानां ग्रहणं कृत्वा स्वकीयं पठनं न समापयति। अपितु तस्मै कृते तु प्रथमं सूत्रार्थग्रहणं तदनन्तरं रूपसिद्धिप्रक्रिया पठनीया भवति। न ह्येतावदेव अस्या रूपसिद्धिप्रक्रियायाः पठनसमये समग्रं व्याकरणं सहैव स्मृतिपथमारोहति। नैतत्करणे रूपसिद्धिप्रक्रियायाः सम्पादनं सम्भवं भवति। एवंविधेन विचारणेन स्पष्टं भवति यदन्येषां पाठ्यग्रन्थानां पठनापेक्षया व्याकरणस्य पाठ्यवस्तु वृद्धं

शेषभागःपंचमपुटे

प्रथमपुटस्य शेषभाग:

## 'वृद्धिरादैच्' इति सूत्रस्य स्वारस्यम्

विस्तीर्णं व्यापकं चास्ति। भगवान् पाणिनिर्हि अस्यैव पाठ्यवस्तुन: सूचना वृद्धिपदमादौ उपस्थाप्य ददाति। एवं वृद्धिपदं प्रथमक्रमे स्थापनस्यैकं स्वारस्यं व्याकरणस्य पाठ्यवस्तु वृद्धमस्ति, अस्या: अपि सूचना दातव्या अस्ति।

5. व्युत्पन्नशब्दत्वेन वृद्धि: (वर्धते अनया सा वृद्धि:) - अर्थात् वर्धनस्य साधनम्। एवंविधं वृद्धिशब्दमादौ प्रयुज्य पाणिनि: सूचयति यदन्य पाठ्यग्रन्थानामपेक्षया अस्य अष्टाध्यायीरूपिपाठ्यवस्तुन: वृद्धविषयवस्तु अर्थात् रूपसिद्धिप्रक्रियायामग्रेसराय वृद्धि: अर्थात् संज्ञा (संज्ञाकरणम्) मार्गदर्शिका पाठकानां कल्याणप्रदा च भविष्यति। व्याकरणशास्त्रे पाठकाय रूपसिद्धिप्रक्रियायाम् अमुकसूत्रानन्तरं किं सूत्र प्रवर्तते, एतज्ज्ञाने काठिन्यं भवति। एतस्मात् काठिन्यात् मुक्तये स्वयमेव भगवान् पाणिनि: वृद्धिशब्दमादौ प्रयुज्य मार्गदर्शनं कृतवान् यद्रूपसिद्धिप्रक्रियाया: आरम्भ: संज्ञासूत्रेण भवति, पश्चाच्च अग्रिमायां प्रक्रियायामपि संज्ञासूत्रमेव मार्गदर्शकं भूत्वावतिष्ठते। एतद्धि परम्परायां '**या या संज्ञा सा सा फलवती**'[5] इति न्यायेन प्रचलनं कृतम्, परञ्चास्य मूलसंकेत: पाणिने: कस्मिन् वचनेऽस्ति, एतत्समाधानं न दृश्यते। अस्माकं मते अस्मिन् वृद्धिशब्दे एष विचार: समायात: यद्रूपसिद्धिप्रक्रियायामग्रेसराय मार्गदर्शकसाधनरूपे संज्ञाकरणमस्ति, एतत्परिज्ञानार्थं भगवता पाणिनिना वृद्धिशब्दस्य पूर्वप्रयोग: कृत:।

एवंविधविचारेण ज्ञायते यद् व्याकरणे सम्पद्यमानायां कस्यामपि रूपसिद्धिप्रक्रियायां सर्वप्रथमं संज्ञाकरणकार्यमेव क्रियते। यथा - सुबन्तपदानां रूपसिद्धिप्रक्रियाया: प्रारम्भ: प्रातिपदिकसंज्ञया तथा तिङन्तस्य पदानां रूपसिद्धिप्रक्रियाया: आरम्भ: धातुसंज्ञया भवति। क्वचित् '**सर्वविधिभ्यो लोपविधिर्बलीयान्**'[6] इति परिभाषया केषांचित् पदानां रूपसिद्धिप्रक्रियाया: आरम्भ: इत्संज्ञया भवति। परमेतत्तु नूनमेवास्ति यत् कस्या: अपि रूपसिद्धिप्रक्रियाया: आरम्भ: संज्ञाकरणेनैव भवति। एष: संकेतोऽपि वृद्धिशब्दस्य पूर्वप्रयोगेण पाणिनिना प्रदत्त:। एतच्च एवंविधमपि ज्ञातव्यं भवति यद् '**भवती**' ति पदस्य यदि रूपसिद्धिप्रक्रिया कर्त्तव्या चेत्तर्हि सर्वप्रथममस्या: रूपसिद्धिप्रक्रियाया: प्रारम्भ: कथं कर्तुं शक्यते इति प्रश्ने सति उत्तरमस्ति-धातुसंज्ञा। धातुसंज्ञा हि भवतीत्यस्य रूपसिद्धिप्रक्रियां प्रारभते। प्रारब्धे सति अग्रिमप्रक्रियायै यदा कापि दिशा न प्राप्येत तदा कामपि संज्ञां स्मरेत्। एवं प्रारब्धा प्रत्येकरूपसिद्धिप्रक्रिया कथमग्रेसरा क्रियते ? कथं ज्ञातव्यं भवेदग्रे का प्रक्रिया कर्त्तव्या? इत्यादीनां समेषां प्रश्नानामुत्तरस्य संकेत: पाणिनिना एतेन वृद्धिशब्देन प्रदत्त:। संक्षेपत: कथयितुं शक्यते यद् रूपसिद्धिप्रक्रियायामग्रगमनरूपवृद्ध्यर्थम् उपयोगिसाधनं व्याकरणस्य समस्ता: संज्ञा: सन्ति।

एवंहि '**वृद्धिरादैजि**'ति सूत्रे वृद्धिपदक्रमस्य स्वारस्यं न केवलं मंगलाचरणम्, अपितु तदतिरिक्तं (क) षड्विधसूत्रेषु संज्ञासूत्रस्य आद्यस्थानीयत्वम्, (ख) सूत्रार्थपरिज्ञाने संज्ञाया: आवश्यकता, (ग) व्याकरण- पाठ्यवस्तुन: वर्धनं तथा च (घ) वर्धितायां पाठ्यवस्तुरूप-रूपसिद्धिप्रक्रियायामग्रगमनाय (अर्थात् वृद्धिप्राप्तये) संज्ञाया: उपयोगिता इत्यादीनां संकेताय भगवता पाणिनिना '**वृद्धिरादैच्**' इति सूत्रे वृद्धिपदस्य पूर्वप्रयोग: कृत:।

ननु '**वृद्धिरादैच्**' इति सूत्रस्थम् आदैजित्यत्र आत् तथा ऐजिति पदद्वयं विद्यते। अत्र आत् इत्यत्र '**तपरस्तत्कालस्य**'') इत्यनेन तपरकरणं कृतं दृश्यते। एतच्च तपरकरणमाकारार्थं नैवावश्यकम्, यत: आकारेण सवर्णग्रहणं नैव भवति। परञ्च ऐजित्यस्य कृते तपरकरणस्यास्य प्रयोजनमस्ति। सामान्यरूपेण ऐजिति प्रत्याहारेण सवर्णग्रहणं भवति, परञ्च तदत्र नेष्यते। अतएवात्र तपरग्रहणं कृत्वा तत्कालस्य विधानं कृतमस्ति येन प्लुतसंज्ञकयो: ऐकारौकारयो: वृद्धिसंज्ञा न भवति।[7]

वस्तुत: सूत्रेऽस्मिन् पदान्ते विद्यमानस्य चकारस्य '**चो: कु:**'[8] इत्यनेन कुत्वे कृते गकारो भवितु-मर्हति। परञ्च '**छन्दोवत्सूत्राणि भवन्ति**'[9] इति वचनानुसारेण सूत्रमेतच्छन्दोवचनं मत्वा '**अयस्मयादीनि छन्दसि**'[10] इत्यत्र निर्दिष्टे अयस्मयादिगणे ऐजिति पदस्य समावेशं कृत्वा अस्य भसंज्ञा क्रियते, येन एकसंज्ञाधिकारमनुसृत्य पदसंज्ञा निषिध्यते, येन चानिष्टं कुत्वमपि निवार्यते।

एतेन सूत्रेण समेषाम् (तद्भावितानामतद्भावितानाम्) आकारैकारौकाराणां वृद्धिरितिसंज्ञा भवति, न केवलं तेषामेव ये वृद्धिकार्येण जायन्ते। यथा- माला इति शब्दे विद्यमान: मकारोत्तर: आकार: यद्यपि वृद्धिकार्येण निर्मितो नास्ति तथापि तस्य अनेन सूत्रेण वृद्धिसंज्ञा भवति। यदीयं वृद्धिसंज्ञा नाभविष्यत् तर्हि 'मालायां भव:' इत्यर्थे 'वृद्धाच्छ:'[11] इति सूत्रेण छप्रत्ययो नैव अप्राप्स्यत येन मालीय: इति रूपं न असेत्स्यत्।


सन्दर्भ-सूची-

1. अष्टाध्यायी - 1.1.1
2. महाभाष्यम्-पस्पशाह्निकम्
3. महाभाष्यम् (प्रदीप:)-पस्पशाह्निकम्
4. काशिका- 'उदक् च विपाश:' इति सूत्रे
5. वैयाकरणसिद्धान्तकौमुदी - भूमिका
6. परिभाषेन्दुशेखर: - 99
7. अष्टाध्यायी - 1.1.70
8. अष्टाध्यायी - 8.2.30
9. महाभाष्यम्- 'वृद्धिरादैच्' इति सूत्रे
10. अष्टाध्यायी - 1.4.20
11. अष्टाध्यायी - 4.2.114


# संस्कृतभारती-उत्तराञ्चलद्वारा "काव्यशास्त्रसम्प्रदायपरिचय:" इति विषये समायोजिता व्याख्यानमाला

वार्ताप्रेषक:- डॉ. मूलचन्द्र-शुक्ल:

उत्तराखण्ड:। संस्कृतभारती-उत्तराञ्चलद्वारा 15-05-2023 दिनाङ्कत: 23-05-2023 दिनाङ्कपर्यन्तं शास्त्रप्रबोधनवर्गे काव्यशास्त्रसम्प्रदायपरिचय: इति मुख्यविषयान्तर्गतानां काव्यशास्त्रस्य षट्सम्प्रदायानां परिचयक्रमे आनलाईनव्याख्यानमाला समायोजिता। तत्र स्काव्ये प्राधान्यम् आत्मत्वं वा रसादिषु तत्त्वेषु कस्य वरीवर्ति इत्येव सिद्धान्तं पुरस्कृत्य रस- अलङ्कार -रीति- ध्वनि-वक्रोक्ति- औचित्येति षट्सम्प्रदायानां परिचय: प्रतिदिनं पृथक्पृथक्- विदुषा पृथक्पृथक्विषयमादाय स्वविचारा: प्रस्तुता:। एतस्मिन्नेव क्रमे प्रथमे दिने उत्तराखण्ड-संस्कृत-विश्वविद्यालय -हरिद्वारस्य सहायकाचार्येण डॉ. कञ्चनतिवारिमहोदयेन "रससम्प्रदायपरिचय:" इति विषये शास्त्रियरीत्या व्याख्यानं प्रदत्तम्।

तेन स्वोद्बोधने आचार्यभरतसम्मतस्य रससूत्रस्य "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति:" इत्यस्य काव्यशास्त्रानुसारं विवेचनं विहितम्। तिवारिमहोदयेन रससूत्रस्य चतुर्णां व्याख्याकाराणां मतानि समुपस्थाय सामाजिकानां रसावबोधदृष्ट्या अभिनवगुप्तसम्मत- अभिव्यक्तिवाद: प्रस्तूयते। द्वितीयदिने राजकीयमहाविद्यालयशीतलाखेतस्य सहायकाचार्य: डॉ. प्रकाशचन्द्रजांगी-महोदय: "अलङ्कारसम्प्रदाय:" इत्यस्मिन् विषये विस्तृतं व्याख्यानं प्रदत्तवान्। स: भामहादीनामालङ्कारिकाणां मतानि उपस्थापनपूर्वकं विविधान् अलङ्कारान् उदाहरति। केन्द्रियसंस्कृतविश्वविद्यालयदेवप्रयागस्य सहायकाचार्येण डॉ. दिनेशचन्द्रपाण्डेयवर्येण तृतीयदिवसे वक्रोक्ति: काव्यजीवितम् इत्यादिकं स्वारस्यं प्रस्तुवता "वक्रोक्तिसम्प्रदायपरिचय:" इति विषये गभीरा चर्चा कृता। चतुर्थे दिने डॉ. नवीनचन्द्रपन्त: "ध्वनिसम्प्रदायपरिचय:" इति विषयके व्याख्याने काव्यस्यात्मा ध्वनि: इत्यादिकम् आनन्दवर्धनाचार्यमतं सोदाहरणं प्रस्तौति। पञ्चमदिवसे "औचित्यसम्प्रदायस्य परिचय:" इति विषये वक्तृत्वेन पी. एन. जी. राजकीयस्नातकोत्तर-महाविद्यालय-रामनगरस्य असि. प्रोफेसर, संस्कृतविभागीय-डॉ. मूलचन्द्र-शुक्लेन श्लोकशास्त्रयोरौचित्यसन्दर्भा: प्रभावपूर्णरीत्या निगदिता:। डॉ. शुक्लमहोदयेन प्रोक्तं यत् अस्य प्रतिष्ठापकाचार्यत्वेन क्षेमेन्द्रो वर्तते।साहित्यज्ञानां कार्याणि वचनानि च औचित्यपूर्णानि भवन्ति,लोकेऽपि समुचितानि वचनानि कार्याणि च सम्पूज्यन्ते अनौचित्ययुतानि कार्याणि च दूष्यन्ते। अत एवोक्तं क्षेमेन्द्रेण- "उचितं प्राहुराचार्या: सदृशं किल यस्य यत्।

उचितस्य च यो भावस्तदौचित्यं प्रचक्षते।।"

तेनोक्तं यत् "औचित्यविचारचर्चा" इत्यत्र ग्रन्थे औचित्यस्य पदादिसप्तविंशतिभेदान् क्षेमेन्द्र: प्रतिपादयति। षष्ठदिने कार्यक्रमसंयोजकेन संस्कृतभारत्या: प्रान्तविद्वत्सदस्येन डॉ. कञ्चनतिवारिमहोदयेन "रीति-गुणसम्प्रदायपरिचय:" इत्यत्र रीतिरात्मा काव्यस्य, विशिष्टा पदरचना रीति: इत्यादिकं रीतिसम्मतं सारगर्भितं व्याख्यानं प्रस्तुतम्। अन्तिमे दिवसे "काव्यशास्त्रपरिचयसमन्वय:" इति विषयके परिचर्चात्मके सत्रे समेषां विदुषां प्रतिभागिनां च कृते परस्परं परिचर्चात्मकस्य सत्रस्य आयोजनं विहितम्। अत्र षट्सम्प्रदायानां स्वस्वमतानुसारं मतप्रस्तुतिपूर्वकं केचन विद्वांसो विद्यार्थिनो वा काव्ये रसस्य प्रामुख्यम् आत्मत्वेन वा केचन ध्वनेरात्मत्वं वा स्वीकृतवन्त:। तत्रापि रसस्य आत्मत्वं सर्वैरपि विद्वद्भि: मुक्तकण्ठेन यथाशास्त्रं स्वीक्रियते।अस्य आध्यक्ष्यं निर्वहति संस्कृतभारत्या: प्रान्ताध्यक्षा डॉ. जानकीत्रिपाठिमहोदया। तया स्वसम्बोधने निगदितं यत् संस्कृतस्य देश- विदेशयो: सर्वत्रापि प्रचार: प्रसार: महत्त्वञ्च दरीदृश्यते।कार्यक्रमेऽस्मिन् प्रतिदिनं संस्कृतभारत्या: विशिष्टविद्वांस अतिथय: संयुता आसन्। तत्र उत्तराखण्ड-संस्कृत-विश्वविद्यालय-हरिद्वारस्य आचार्य: डॉ. प्रकाशचन्द्रपन्त:, डॉ. सञ्जूप्रसादध्यानी, डॉ. चन्द्रप्रकाश -उप्रेती इत्यादयो विद्वांस: यथाकालम् उद्बोधितवन्त:। व्याख्यानान्ते डॉ. दिनेशचन्द्रपाण्डेय:,डॉ.जगदीशजोशी इत्यादय अतिथिभि: सह समेषां प्रतिभागिनां कातज्ञ्यं निवेदितवन्त:।कार्यक्रमस्य सञ्चालनं तकनीकिसहयोगश्च डॉ. जगदीशजोशी महोदयेन सम्पादित:।द्य कार्यक्रमे डॉ. दिनेशचन्द्रपाण्डेय:,डॉ.कुलदीपमैन्दोला,डॉ.जगदीशपाण्डेय:,डॉ. नीलेश:,डॉ. चन्द्रप्रकाश उप्रेती,डॉ. भानुपाण्डेय:,डॉ. मूलचन्द्र-शुक्ल:, हेमन्तजोशी,संस्कृतभारत्या: नैके पदाधिकारिण:, कार्यकर्तार: ,पिपठिषव: जिज्ञासवश्च विद्यार्थिन इत्यादय उपस्थिता आसन्।

# प्राचीनभारतीय-आचार्यपरम्परायाम् आदिशङ्कराचार्य:

डा.धनञ्जय कुमार आचार्य

नवदेहली। सामरस्यपूर्णसमाजस्य पुरोधा जगद्गुरु: शङ्कराचार्य: - प्रो० रमेशचन्द्रो भारद्वाज: (वेव्स द्वारा आयोजिते द्वितीये प्रो० भूदेवशर्मा




स्मृतिनामके व्याख्याने)

वेव्स (वाइडर एसोसिएसन फॉर वैदिक स्टडीज) संस्थया मई मासस्य विंशतितमे दिनाङ्के शनिवासरे (२०.०५.२०२३) अन्तर्जाल-(गूगलमीट) माध्यमेन सायंकाले "प्राचीनभारतीय-आचार्यपरम्परायाम् आदिशङ्कराचार्य:" इति विषयमधिकृत्य प्रो० भूदेवशर्मास्मारकनामकं द्वितीयं व्याख्यानं आयोजितम्। प्रो० भूदेवशर्मा प्रसिद्ध: गणितज्ञ:, वैदिकसंस्कृते: समुपासक: वेव्स इति संस्थायाश्च संस्थापकोऽध्यक्षश्चासीत्।

व्याख्यानस्यास्य शुभारम्भ: ऋषिकान्त: ओझा (छात्र:, संस्कृतविभाग:, इलाहाबादविश्वविद्यालय:) वैदिकेन मङ्गलाचरणेन सुश्री दीक्षा पाण्डेय च (छात्रा, संस्कृतविभाग:, इलाहाबादविश्वविद्यालय:) जगद्गुरो: शङ्कराचार्यस्य स्तुतिभि: अकुरुताम्।

एतदनन्तरं श्रीकृष्णवर्य: प्रो० शर्मण: संस्मरणानि सभामध्ये अश्रावयत्। ततश्च प्रो० शशितिवारी (अध्यक्षा, वेव्स, भारतम्) अतिथीनां समुपस्थितानां सर्वेषामपि च प्रबुद्धजनानां वाचिकं स्वागतमभिनन्दनञ्च अकरोत्।

व्याख्यानस्य मुख्यवक्ता प्रो० रमेशचन्द्रो भारद्वाज: (कुलपति:, महर्षि-वाल्मीकि-संस्कृत-विश्वविद्यालय:, कैथल:, हरियाणा), अध्यक्षश्च प्रो० लल्लनप्रसाद: (पूर्व संकायप्रमुख:, बिजनस इकोनामिक्स, देहली) आस्ताम्। मुख्यवक्ता प्रो० भारद्वाज: सभां सम्बोधयन् अवदत् यत् आदिगुरुं शङ्कराचार्य वयं वेदान्तस्य संस्थापकरूपेण श्रेष्ठदार्शनिकरूपेण तु स्मराम: एव, परं इतोऽप्यधिकं ते समाजचिन्तक-परिष्कारकरूपेण स्मर्तव्या:। राष्ट्रे समरसतां प्रचार्यमाण: स: महापुरुष: अद्वितीय:। चतुर्षु दिक्षु मठान् संस्थाप्य राष्ट्रस्य संस्कृतिं संरक्ष्य एकत्वभावनां च प्रसार्य आदिगुरुणा महदुपकार: कृत:। सम्पूर्णेऽपि भारतवर्षे दिग्विजययात्राद्वयम् अनुष्ठितम्। अध्यक्षीयभाषणे प्रो० लल्लनप्रसादेन वेदान्तीयसिद्धान्ता: सभायां प्रस्तुता:। कार्यक्रमस्य सफलायोजनाय च साधुवादम् आशीर्वचांसि च प्रदत्ता:।

स्मृतिव्याख्यानस्यास्य धन्यवादज्ञापनं डॉ० अपर्णा धीर खण्डेलवाल (सचिव, वेव्स, भारत:) कृतवती कुशलञ्च सञ्चालनं डॉ० विकासशर्मा (सहायकाचार्य:, संस्कृतविभाग:, इलाहाबादविश्वविद्यालय:) अकरोत्।

विषयेऽस्मिन् चर्चासत्रा: प्रश्नोत्तरसत्रञ्चापि अभवन्, येषु डॉ० धनञ्जयभंज:, डॉ० निरुपमा त्रिपाठी, श्री सतीशपाण्डेयादय: विदुष: विशेषरूपेण भागग्रहणमकुर्वन्। अस्मिन् द्वितीये व्याख्याने प्रो० प्रयागनारायणमिश्र:, प्रो. रणजित् बेहेरा, डा.धनञ्जयकुमारआचार्य:, डॉ० निरुपमा त्रिपाठी, डॉ० प्रचेतस:, डॉ० संदीपकुमारयादव:, डॉ० राघवेन्द्रमिश्र:, डॉ० अनिल:, प्रो० अञ्जू सेठ, प्रो० चन्द्रप्रकाशभारद्वाज:, प्रो० आशा, डॉ० विश्वजीतविद्यालङ्कार:, सुश्री सुरुचि: शर्मा, ब्रिगेडियर जीवनराजपुरोहित:, पूर्व: अपरायुक्त: राजेन्द्रनाथ:, आर.एस.कौशल:, श्री विद्यासागर:, श्री योगेन्द्र: वाधवा, श्री जयभगवान, डॉ० विनोद तिवारी, श्री योगेन्द्रदत्त: तथा प्रो० जयप्रकाशनारायण: चेत्यादय: शताधिका: विभागाध्यक्षा:, प्राचार्या:, शिक्षका:, प्रबुद्धा: शोधार्थिनश्च देश-विदेशेभ्य: उपस्थिता: अभवन्।

## हा हतोऽस्मि



-महाचार्य्यःमनतोषःभट्टाचार्यः

कौपीनवन्तं खलु भाग्यवन्तं पश्यन्ति ये किं न गृहे वसन्ति।
कौपीनमात्रं परिधाय भिन्नं खिन्ना गृहस्थाः क्व च भाग्यवन्तः।।१।।
संसारवासं परिहाय ये वै कौपिनवन्तोऽथ न वा भवेयुः।
सौभाग्यवन्तः खलु ते गृहस्थाश्चेत् कोपीनैर्वा न च वा हतास्स्युः।।२।।
सच्चिन्ताकुलसज्जनोऽपि विवशस्संसारपाशा हतस्-
सन्मित्राश्रितबोधचन्द्रकिरणैस्सोद्भाषितो राहुणा।
ग्रस्तः किं ह्यचिराद्विमुक्तिममलामाप्नोति मत्वा सखे
दृष्ट्वा तं परितस्तमोनिपतितं नैराश्यमिच्छेन्न भोः।।३।।
एकं द्विकं त्रिकं क्रमाच्छतकं चेच्छया भवेत्।
काव्यं वाकविना शेते कुब्जश्चोत्तानतस्सखे।।४।।
भूयांसस्सन्ति सत्यं यदपि च कवयस्तेषु दीनो न गण्यो
व्याघ्रे सिंहे गजे वा वसति ननु वने चञ्चलः किं मृगो भोः।
पादक्षेपैर्वनानीं क्वचिदिह कुरुते दर्शने सोत्सुकां तां
व्याघ्रादीनां प्रचण्डैर्गुरुगुरुनिनदैश्श्रूयते मर्मरं नो।।५।।
मर्मज्ञस्त्वं सुहृन्मे कुकविलघुरुतं निर्गतं कण्ठदेशाद्-
दूराद्वा कर्णयोस्ते प्रविशति यदि हा दीन एषोऽस्मि धन्यः।
शब्दैरुच्चौश्श्रुती ते खलु यदि भवतो ह्यक्षमे नैव चेतस्-
स्याद्रुद्धं मर्मवेत्तुर्ह्यथ मम कविता कर्णलग्ना भवेत्ते।।६।।

## शववाहकाः ( अनुष्टुप् )



डॉ.हर्षदेवमाधवः

रिक्तं कृत्वा गृहं सर्वं गच्छन्ति शववाहकाः ।
रामनाम्नः कदम्बेन चलन्ति शववाहकाः ।।
गृहस्वामी गतो दूरं विहाय धनसम्पदः ।
मृत्तिकां तु शरीरस्य वहन्ति शववाहकाः ।।
सन्तोषं जीर्णनाशस्य निगूह्य दम्भपूर्वकम् ।
प्रदर्श्य बाह्यसन्तापं रुदन्ति शववाहकाः ।।
'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।'
न ज्ञात्वा केवलं मिथ्या वदन्ति शववाहकाः ।।
अवतीर्णो भविष्यामि शब्दे शब्दे पुनः पुनः ।
शब्दगर्भेऽक्षरं मां किं दहन्ति शववाहकाः ।।
दृष्ट्वा तु नश्वरं विश्वं नष्टं वह्नौ धगद्धगत् ।
मूका भूत्वा महामौने मज्जन्ति शववाहकाः ।।
ज्ञानाग्नौ भस्मसात् कृत्वा जीविते सर्ववासनाः ।
श्मशाने खलु संसारे नृत्यन्ति शववाहकाः ।।

## तमः

(सुन्दरीवृत्ते गझलगीति : )

शिवमूर्धनि चन्द्रलेखया द्युतिक्रोडे ननु रक्ष्यते तमः ।
गिरिशेन च कण्ठलाञ्छने रहसि तच्च विभूष्यते तमः ।।
मलिनञ्च दरिद्रतां गतं नितरां क्षाममुखं दिगम्बरम् ।
कुटित् कुटिरं प्रयाति किं द्युतिरेखां निशि याचते तमः ।।
प्रलये गहने परात्परे शशिसूर्यौ न नभो न तारकाः ।
निरवद्यं ननु सर्वथा तदा प्रभविष्णु ह्यथ शिष्यते तमः ।।
शशिना धवले चराचरेद्युतिदिव्ये धरणौ पलायितम् ।
तरुभिस्स्वतलेषु चौरवन् निजकक्षेषु निगूह्यते तमः ।।
वचनेषु प्रसन्नमुद्रया शुचिता सज्जनता च दक्षता ।
खलदुष्टजनस्य मानसैः सदयैरेव सुगोप्यते तमः ।।
दुरितैर्निशिचारिणां गणै रहसि ' भातृजनैर्विवर्धितम् ।
तमसो बलवत्तरं मुदा ह्यशुभं हन्त ! वितन्यते तमः ।।

●भातृजनैः - भाईलोग
( अयुजोर्यदि सौ जगौ युजोः सभरा लगौ यदि सुन्दरी तदा । )
( स स जगा, सभर लगा ) (छन्दोमञ्जरी, ३-५ )

## शिवोऽहम्

( शशिवदनावृत्ते गझलगीतिः )

अचलशिवोऽहम् ।
चपलशिवोऽहम् ।।
पुनरथ माया-
शबलशिवोऽहम् ।।
हिमगिरिवास
धवलशिवोऽहम् ।।
प्रकृतिविहीनो
विफलशिवोऽहम् ।।
गगनगभीरो
विरलशिवोऽहम् ।।
शशिधरमौलीः
सरलशिवोऽहम् ।।
प्रकृतिविकारै-
स्तरलशिवोऽहम् ।।
गरलकलङ्को
ह्यमलशिवोऽहम् ।।
प्रतिनवरूपं
•नवलशिवोऽहम् ।।
स्फुरणविलासः ।
कललशिवोऽहम् ।।
प्रतिलघुसृष्टि
कवलशिवोऽहम् ।।
प्रलयगुहायां प्रबलशिवोऽहम् ।।

• नवं लाति इति नवलः ।
( शशिवदना न्यौ न य )
(छन्दोमञ्जरी द्वितीयस्तबकः- ७)

**साभारः जानन्तु ते**



## सेंगोलनन्दिप्रमा



प्रणेता©
प्रो. ताराशंकरशर्मा पाण्डेयः

लार्डो वायसरायमोंटबिटनः स्वातन्त्र्यकालोत्सवे
किं स्यात् पृच्छति नेहरुं प्रतिनिधिं चिह्नं च सत्ताग्रहे।
प्रत्ने श्रीमति चोलराज्यसमये सेंगोलदानप्रथा
तामेवोत्तरणे प्रथां कथयते श्रीराजगोपालधीः।।1।।
सप्ताम्भोधिनवैकवत्सरमिते मासेऽष्टमे नक्तके
सौहार्देन गुरौ चतुर्दशतिथौ स्वातन्त्र्यसंसूचकम्।
लार्डो यो ब्रिटिशाज्ञया प्रकुरुते कार्यादिवृत्तं समं
श्रीमन्तं स जवाहरं प्रददते सेंगोलदण्डं शुभम्।।2।।
नन्दी राजतपंचफीटसमिते सौवर्णसेंगोलके
सद्धर्मास्पदपादसंप्रसरणो मानेन संशोभताम्।
तत्राशोकप्रतीकचक्रगतिदः स्याद्भारतीयो ध्वजो
राष्ट्रं मे सरतात्सदा विजयतां सानातनं भारतम्।।3।।
स्वातन्त्र्यं जनतान्त्रिकं सुललितं स्याद्भारते सर्वदा
संसत्सद्मनि राजकार्यकरणे स्यान्न्यायनिष्पक्षता।
सत्तास्वीकृतिपंचसप्ततिशरत्पूर्वं गृहीतो मुदा
नन्दी भारतराजदण्डप्रहरी सेंगोलसंज्ञो महान्।।4।।
पादोने शतके स सज्जकरणो गुप्तः प्रयागे स्थितः
सुप्तः सम्प्रति लोकतन्त्रजनको जाग्रन्मना उत्थितः।
नीत्याऽऽसादितदिव्यविग्रहयुतः साक्षाद्धि प्रत्यागत
आनन्दोत्थित एष संसदि नयोत्फुल्लः स नन्दी मतः।।5।।
नव्या नीतिमती विनिर्मितिवती संसत्पुरः शोभते
शक्तेर्वाहनकेसरी सुमिलितः स्याद्वै स्वयम्भूः पुरः।
तत्तत्रैव ममापि वाससुरुचिर्जागर्ति सख्या समं
तन्मित्र प्रविशाम्यहं समहसा सन्धत्स्व मे स्वागतम्।।6।।
लोकानामुपकारकप्रतिनिधिः कल्याणकर्ताऽऽतुरः
संज्ञानात्मककर्मयज्ञविधिपाः सज्जोस्ति नित्यं प्रभुः।
राष्ट्रे लोकसभापतेरुपगतः सेंगोलदण्डोच्छ्रितः
शम्भोस्ते शिवमूर्तिरूपरुचिरो नन्दी परं राजते।।7।।
पञ्चास्यश्चतुराननः त्रिभुवने- ऽशोकप्रतीकात्मकः
सत्ताकेन्द्रविराजमाननिपुणः शक्त्या मृगेन्द्रो मतः।
सत्ता विश्वगुरुर्भवेच्छिवकरी सेंगोलनन्दिप्रमा
सिद्धौ स्तः शिवनन्दिशक्तिवहनौ संसद्विहंगेक्षणौ।।8।।
विश्वामित्र इवाऽपरो नयविधेर्वेत्ता नियन्ता प्रभु
यो नन्दी जगतो शिवाग्रहमतः साक्षाच्छिवो राजते।
विश्वेऽशोकमनोभिलाषकरणे शक्तिग्रहः केसरी
प्रत्यक्षं शिवशक्तिनामलिखितं राष्ट्रं जयेद् भारतम्।।9।।
सद्धस्तान्तरणे प्रमाणविषयं सेंगोलचिह्नं मतं
सत्ताशासनभक्तिशक्तिशरणो धत्ते नरेन्द्रोपरः।
सेंगोलत्सरुटंकितेषु विशदं स्वातन्त्र्यसंकेतकं
सत्त्वस्थं लहरीयते स्फुरितकै राष्ट्रत्रिरंगद्वयम्।।10।।
कल्याणार्थमिवोच्छ्रितोस्ति जगतो नन्दी शिवः शंकरः
विश्वोत्तुंगमुखः समर्थप्रमुखः शक्त्या समं केसरी।
इत्थंभूतविलक्षणं प्रशरणं भूयो भवेद्भारतं
राष्ट्रं मे शिवशक्तिरक्षितमिव प्रत्यग्रभूतं जयेत्।।11।।

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित- प्रतिनवबाणभट्ट- पण्डित-श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय-कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं 'सेंगोलनन्दिप्रमैकादशी' नाम काव्यं 'सम्पूर्णम्।

## ।। शिवार्चनम् ।। स्वर नचारी।



-डॉ. निरंजन मिश्र

अयि शिव नो मम मन्त्रबलं नहि तन्त्रबलं नहि यन्त्रबलं
नहि पुरुषार्जितरत्नसमुच्चयजन्य बलं नहि बन्धुबलम्।
नहि जनतन्त्रनियोजनसूत्रधरप्रभयास्फुरितात्मबलं
बलमिह मानसवारिजषट्पदगुञ्जनमेव तव स्तवनम्।।1
तव कृपयैव समस्तबलं स्फुरतीह तथा शयनं कुरुते
करपदहीनजनोऽपि गिरीशशिखासु मुदा भ्रमणं कुरुते।
कथमिह मद्वचनं श्रवणे तव न स्पृशतीति विचारबलात्
भ्रमितमतेरिह केवलमेकबलं सततं हि तव स्तवनम्।।2
तव कृपयैव यदा जडचेतनजीवनमस्ति तदात्र कथं
मयि तव नास्ति कृपेति वदिष्यति केन बलेन च कस्य मुखम्।
मनुजगतेरवलम्बनमेव भवति सदा विकलाचरणं
क्षणिकसुखेन हि विस्मरणं विपरीतगतौ च तव स्मरणम्।।3
तव कृपयैव हि रोदिमि शंकर नृत्यरतोऽपि भवाम्यथवा
मम करयोस्तु सदैकबलं मनसा सततं हि तव स्मरणम्।
दुरितनिवारणशक्तिविलासिन्! तव चरणे किल कस्य भयं
तदपि मनो मम चंचलतां न जहाति विरौति सदा विकलम्।।4
मनसि सदा तव सुस्थिरतैव भवेदिति याचनमस्ति विभो!
विलसतु मानसवारिजषट्पदगानमिषाद्धि तव स्तवनम्।
त्वमिह करिष्यसि किं च कदेति विचिन्तनमेव करोमि कथं
धनपतिसेवनदग्धतनोरिह भिक्षुकसेवनमेव वरम्।।5
चरणयुगे पतितोऽस्मि तवैव हि शातय ताडय हासय वा
विकटभटैरपसारय वा गिरिजाकृपयात्र विकासय वा।
हर हर हीरकहारसमंचितमानधनागमबुद्धिबलं
शशधर! मा हर किन्त्विह मानस गानमिषाद्विकलस्तवनम्।।6

## ग्रामशोभावैभवम्



-डॉ. अरविन्दकुमारतिवारी

ग्रीष्मकाले मनोहारिणीयं प्रिया
सर्वचेतश्चमत्कारिणी सौख्यदा।
चण्डतापं हरन्ती किरन्ती विभां
ग्रामशोभाधुना दर्शनीया प्रिया।। १
आम्रवृक्षेषु कूजत्खगानां रवैः
कीरमायूरशावैः सदालंकृता।
जम्बुपक्वाम्रबिल्वादिभी राजिता
ग्रामशोभाधुना दर्शनीया प्रिया।। २
यत्र मध्याह्नकाले भ्रमन्तो मुदा
बालका बालखेलं तडागं श्रिताः।
तत्र खेलन्ति तर्तुं जलं नन्दिता
ग्रामशोभाधुना दर्शनीया प्रिया।। ३
राजते+श्वत्थवृक्षो विशालो युगात
मन्दिरं शंकरस्य ध्रुवं छादयन्।
घण्टिकानां स्वरो यत्र तत्रोत्थितो
ग्रामशोभाधुना दर्शनीया प्रिया।। ४
यत्र केदारके शालिबीजं जनाः
संक्षिपन्तीव संस्कारिते कर्षकाः।
तत्र जीवादहो रक्षितुं तत्परा
ग्रामशोभाधुना दर्शनीया प्रिया।। ५

## कीदृशः



- डॉ-शशिकान्त तिवारी 'शशिधर'

शुद्धाचारयुतो विनम्रहृदयो नो चेद्बुधः कीदृशः?
नो लावण्यवपुः कटाक्षनयना कान्ता च सा कीदृशी?।
रागी यस्स्वरसाधको न स महान्सद्गायकः कीदृशः?
काव्यं यस्य चमत्कृतं रसभरं नासौ कविः कीदृशः?।।01।।
साहाय्यन्नहि निर्धनस्य कुरुते श्रेष्ठो धनी कीदृशः?
शिष्यान्नो परिपाठयेदहरहो!सोध्यापकः कीदृशः?।
राजानन्न परामृशेच्छिवपथं मन्त्री स वै कीदृशः?
मातातौ नहि सेवते धनबलैः पुत्रस्सखे!कीदृशः?।।02।।
नित्यन्नो भगवन्तमेव भजताद्भक्तस्स वै कीदृशः?
नैवं पाठयतात्स्वसन्ततिमहो!श्रेष्ठः पिता कीदृशः?।
सन्ध्याहोमजपादिकर्मणिरतो नासौ द्विजः कीदृशः?
भर्त्तारं परिसेवते न मनसा भार्या च सा कीदृशी?।।03।।
यस्मिन्नैव हि योषिता सुमुदिता गेहस्सखे कीदृशः?
यस्यान्नो रमतान्महत्कविगणस्सा सत्सभा कीदृशी? ।
योग्यैर्नैव सुशिक्षकैर्विलसिता संस्था च सा कीदृशी?
त्यागानन्दभवाब्धिमज्जनरतो नो चेन्मुनिः कीदृशः?।।04।।
धैर्यन्नो वपुषीह चेद्बलिवरो विद्वद्वरः कीदृशः?
सोदर्य्यं विजहाति यो हि विपदि भ्राता सखे!कीदृशः?
मित्रं दर्शयतीह नो शिवपथं मित्रं सखे!कीदृशं?
चाञ्चल्येन युतं भवेन्न सुखदं बाल्यं वयः कीदृशम्?।।05।।

# प्रत्नकीर्ति- प्राच्य- शोध- संस्थानस्य वाराणसीस्थस्य सदस्यानां सम्मेलनमभवत्



विशिष्टसदस्यःप्रोफेसर राम विनय सिंह महोदयः संस्थानस्य सचिवाय प्रोफेसर प्रताप मिश्राय धनराशिं प्रयच्छति



विशिष्ट सदस्याय डॉ पुष्कर आनन्द महोदयाय प्रत्नकीर्ति पत्रिका प्रदीयते



संस्थानस्य संयुक्तसचिवः (शोध) डॉ विमलेन्दु कुमार त्रिपाठी संस्थानस्य प्रकाशनं समागतजनेभ्यः प्रददाति

उच्यते सत्यमेव समयेन, शास्त्राणि अनादिकालाद् रक्ष्यन्ते, कदाचित् कश्चित् साहित्यरतो मनस्वी दुर्लभग्रन्थानां पुस्तकालये संरक्षणं करोति, प्रचारयति सहृदयेषु, प्रसारयति जनतासु, इदम् आध्यात्मिकं यजनमेव मन्यन्ते मुनिनो गुणग्राहिणो विद्वांस इति जानीमो वयम्। एतादृशानामेव विदुषाममूल्ययोगदानेन भारतीयता रक्षिता वर्तते। इमामेव ऋषिपरम्परां पालयन्ति अस्माकं बन्धवः प्रो. प्रतापमिश्राः, ये सुकवयो गवेषकाः कथेतिहासपुराणसाहित्यादिसमग्रनिधीनां परिशीलयितारः पातारश्च सन्तीति निस्सन्देहं वच्मि।

आचार्यवासुदेवद्विना गुरुवर्याणामेते अन्तेवासिनः प्रत्नकीर्तिप्राच्यशोधसंस्थानं वाराणस्यां संस्थाप्य काश्या गरिमाणं वर्धयन्तः महिमानं भारतीसंस्कृतेः दर्शयन्तः , तनिमानमलसानां नाशयन्तः, लघिमानमुपहासकानां हरन्तः, युवविद्वत्सु जागरिताः प्रेरका इव शोभन्ते। काशीं गता गतदिवसेषु अकस्मादुपस्थिता वयं शोधसंस्थानमिदमालोक्य तत्रत्यानि कार्याणि विमृश्य आनन्दिताः। महती चर्चास्माकं सम्पन्ना। ग्रीष्मसरिद्धाराप्रवाह इव बहुकालाद् अवरुद्धो विचारप्रवाहः प्रावृट्सरित्प्रवाह इवाजायत। आदिनं संस्कृतसाहित्यविषये क्रियमाणा परिचर्चा नास्मामत्यजत्।

सुहृदः! इदं संस्थानं पाण्डुलिपिसंरक्षणं यथाकालं तत्प्रकाशनमपि करोति। प्रत्नकीर्तिसंस्थानस्य दर्शनीयः पुस्तकालयः समेटा संस्कृतानुरागिणां चेतश्चोरयति।

प्रत्नकीर्तिपत्रिकाम्,
संस्थानपरिचायिकाम्,
विश्वनाथकोरीडोरपञ्चाशिका,
बटेश्वरनाथः (संस्कृतरूपान्तरितः),
स्त्री वा सिंहो वा?
इति बन्धुवर्याणां करकमलाभ्यामलभामहि।

संस्थानं युवलेखकान्, लेखकान् प्रार्थयति यत् भवन्तः निजनवरचनाम् अन्यां कामपि कस्यचित् कवेः कृतिं संस्थाने प्रेषयन्तु। नवलेखकाः अवश्यमेव समीक्षार्थमुपायनीकुर्वन्तु स्वरचनामिति। अर्वाचीनसंस्कृतमत्र संग्रहणीयं भवेदितिधिया यथाशक्यं प्रयतन्ताम्। अस्तु कदाचित् काशीगमनं भवेच्चेदवश्यमेव संस्थानमिदमवलोकनीयम्।

**संस्थानस्य पत्राचार संकेतः**

Pratnakirti oriental research Institute
Arazi no. 469, satyam nagar colony,
Bagawanpur. B.H.U.
Varansi PIN 221005 U. P.




# उज्जयिन्यां भारतीयवैदिकगणितपरम्परा इतिविषयमधिकृत्य विशिष्टव्याख्यानं सञ्जातम्

(वार्तासंयोजकः डॉ. दिनेश चौबे)

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयः, शासकीयमाधवविज्ञान महाविद्यालयः एवञ्च विज्ञानभारती, उज्जयिनी इत्येताषां संस्थानां संयुक्ततत्तावधाने भारतीयगणितवैदिक



गणितपरम्परा इतिः विषये विशिष्टव्याख्यानस्यमायोजनं मेयमासस्य २९ तमे दिनाङ्के सोमवासरे सायम्चतुर्वादने शासकीयमाधवविज्ञानमहा विद्यालयस्य-देवासमार्गपरिसरस्य सभागारे



अभूत। समारोहेऽस्मिन् मुख्यवक्तृरूपेणसुप्रसिद्धगणितज्ञः श्रीरमेशजीमोरखण्डीकरः अहमदाबादनगरतः उपस्थितः आसीत।कार्यक्रमोऽयम् पाणिनिसंस्कृतविश्वविद्यालयस्य माननीयकुलपतिः आचार्यविजय कुमारसीजीमेनन्महोदयस्य आध्यक्षत्वे अभूत। समारोहेस्मिन् शासकीय माधवविज्ञानमहाविद्यालयस्य प्राचार्यः डॉ. वी.के.गुप्तवर्यः उपस्थितः आसीत् । समारोहस्य शुभारम्भःवैदिकमङ्गलाचरणेन दीपदीपनेन सरस्वतीवन्दनया, च सञ्जातः । तदनु अतिथीनां पुष्पमाल्यार्पणेन-वचनकुसुमैः च् प्राचार्येण स्वागतं विहितम्। मुख्यवक्ता श्रीरमेशमहोदयेन भारतीयवैदिकगणितपरम्परायाः पुराकालादारभ्य अद्यावधिपर्यन्तमध्ययनप्रक्रियायाः विषये विस्तरेण पीपीटी माध्यमेन च गणितशास्त्रस्य सूत्राणाम्, अङ्कानां प्रत्याख्यानं प्रस्तुतम् । तेन वैदिकगणितभारतीयगणित ब्रह्मगुप्तसिद्धान्तसम्बद्धरेखा-बीजगणितादयाः सम्पृक्तबहवः अंशाः प्रतिपादिताः-कार्यक्रमे अध्यक्षरूपेणविराजमानेन पाणिनिसंस्कृतविश्वविद्यालयस्य मान्यकुलपतिः आचार्य विजयकुमारमेनन्महोदयेन निगदितम् यत् भारतीयज्ञान परम्परायाम् अनादिकालादेव गणितशास्त्रस्य अध्ययनस्य काचित् विशिष्टा परम्परा आसीत् संप्रति सा परम्परा कालप्रभावेण परिवर्तिता जाता पुनः तां परम्परां संस्थाप्य वैदिकगणितशास्त्रस्य अध्ययनम् अनिवार्यरूपेण कारणीयमिति। कार्यक्रमस्य सञ्चालनं महाविद्यालयस्य प्राध्यापिका डॉ. शुभासोचेमहोदया कृतवती । समारोहे विज्ञानभारत्या पदाधिकारिणः, कार्यकर्तारः, पाणिनिविश्वविद्यालयस्य-माधवमहाविद्यालयस्य अन्यविद्यालयस्य च् अध्यापकाः,अधिकारिणः, कर्मचारिणः, छात्राः, शोधच्छात्राः,नगरस्य सुधीजनाः पत्रकारवान्धवाश्च समुपस्थिताः आसन्। आभारप्रदर्शनं पाणिनिविश्वविद्यालयस्य कुलसचिवेन डॉ. दिलीपसोनीमहोदयेन कृतम् ।कल्याणमन्त्रेण सह सभा समाप्ता जाता।

प्रथमपुटस्य शेषभागः **स्वामिश्रद्धानंदयज्ञशालायाः....**

प्रो0 डी0एस0 मलिकः, प्रो जे०एस० मलिकः, प्रो0 सुचित्रा मलिकः, प्रो0 ब्रह्मदेवः, प्रो0 सुरेन्द्र त्यागी, डा0 अजय मलिकः, डा0 शिवकुमार चौहानः, प्रमोद कुमारः, प्रकाश चन्द्र तिवारी, डा0 पंकज कौशिकः, कुलभूषण शर्मा, वीरेंद्र पटवालः, अमित धीमानः, डा0 जसवीर मलिकः, डा0 निशान्तः, डा0 विपुल भट्टः, इत्यादयः विद्वांसः उपस्थिताः। निर्माणाय स्वामी यज्ञमुनिः 21000 रुप्यकाणि, 11000 रु. सत्यपाल सिंहः , 11000 रु.कुलपतिः प्रो सोमदेव शतांशुः एवं च 11000 रु. कुलसचिवः प्रो सुनील कुमारः दातम् घोषितवन्तः । अभियांत्रिकी एवं प्रौद्योगिकी संकायस्य पूर्वतनच्छात्राः सहयोगं कर्तुम् उद्घोषितवन्तः

# पूर्वकेंद्रीयमंत्री डॉ जोशी प्रो फूलचंद प्रेमिणे वर्याय ऋषभदेवसम्मानं दत्तवान्

गाजियाबादम् माताश्रीकौशलदेव्याः सान्निध्ये मईमासीये 25-26दिनाङ्के आयोजिते राष्ट्रिय विद्वत्संगोष्ठीस्थापना दिवस समारोहे ऋषभांचले वाराणसी राष्ट्रपति सम्मानिताय प्रो फूलचंद जैन प्रेमिणे भारतीय ज्ञानपीठतः प्रकाशितायै महत्त्वपूर्ण कृतये 'श्रमण संस्कृति और वैदिक व्रात्याय' संस्थायाः सर्वोत्कृष्टेन ऋषभदेव पुरस्कारेण सम्मानितवान् । प्रो जोशी मंचे एव पुस्तकं पठित्वा लेखकाय बर्धापनानि। संस्थाध्यक्षःश्री जीवेंद्र जैनः शोध कार्यम् अद्वितीयं कथयित्वा इतिहासस्य नूतन तथ्यानाम् उद्घाटकं प्रत्यपादयत्। श्री हेमचंद जैनः,दिल्ली कथितवान् प्रो. प्रेमी स्वयं तु श्रुत सेवाकरोतसममेव पूर्णपरिवारं भारतीय संस्कृतौ, इतिहासे,भाषायां,दर्शने एवं पुरातत्व क्षेत्रे च सेवानिमित्तं प्रशिक्षितवान् । अस्य धर्म पत्नी डॉ मुन्नीपुष्पा जैनः ब्राह्मी लिपेः विदूषी , सुपुत्र प्रो अनेकान्त कुमार जैनः,नई दिल्ली प्राकृत भाषायै राष्ट्रपतिना सम्मानितः, सुपुत्री डॉ इंदु जैनः,नई संसदः उद्घाटने धर्मसभायां प्रस्तुतिः दत्ता, सुपुत्र डॉ अरिहंत जैनः,मुम्बई , ज्ञातव्यं यत् प्रो. प्रेमी विगतेभ्यः 60 वर्षेभ्यः वाराणस्यां साहित्य साधनां कुरुते । अद्य संपूर्णानंद संस्कृत विश्वविद्यालय-वाराणस्यां जैनदर्शन विभागीयः अध्यक्षः अवर्तते । अखिल भारतवर्षीय दिगंबर जैन विद्वतपरिषदः अध्यक्षः अवर्तत । अवसरेस्मिन् डॉ नरेंद्र जैनः,प्रो अनेकान्त कुमार जैनः,राजेन्द्र महावीरः इत्यादयः अनेके विद्वांसः एवं पत्रकाराः अपि उपस्थिताः । तत्र उपस्थितेन पदाधिकारिगणेन प्रेमीमहोदयाय शुभकामनाः अनेकाः दत्ताः ।



# पतंजलिगुरुकुले, देवप्रयागे शास्त्रीयस्पर्धा समायोजिता

सनातन मूल्य एवं शास्त्रगरिम्णः स्थापनायै शास्त्रीय स्पर्धा आयोजिता तत्र उद्घाटनं स्वामी रामदेवः अकरोत् प्रतियोगिता इयं प्रतिर्षम् आयोज्यते। अस्मिन् पतंजलि योगपीठ द्वारा संचालितानां त्रयाणां गुरुकुल




पतंजलि गुरुकुलम् हरिद्वारम् (बालक परिसरः), पतंजलि गुरुकुलम् हरिद्वारम् (बालिका परिसरः) एवं पतंजलि गुरुकुलम् मूल्या ग्रामः, देवप्रयागः इत्येषां प्रायः 184 छात्राः प्रतिभागम् अकुर्वन् । तत्र मुख्यतः वेदः, दर्शनं, उपनिषद्, श्रीमद्भगवद्गीता, पंचोपदेशः, हठयोगप्रदीपिका, घेरण्ड संहिता इत्येषाम् अनेक शास्त्राणां कण्ठपाठे प्रतिभागं कुर्वन्ति। स्वामी रामदेवः उक्तवान् शास्त्रं अस्मत् समृद्ध संस्कृतिः बौद्धिकन्यासः च वर्तते तत् स्मरणेन बालानाम् अंतःकरणं साक्षात् ऋषि परंपरायाः तपसा ज्ञानेन च अभिसिंचितं भवति। व्यक्तित्व निर्माणं, शिक्षायाः उद्देश्यं भवेत् । अवसरेस्मिन् भारतीय शिक्षा परिषदः अध्यक्षः एन. पी. सिंहः अपि उपस्थितः तेन आश्वसितं भारतं शीघ्रमेव सांस्कृतिक महाशक्ति रूपेण विश्वस्मिन् स्थापितं भविष्यति।

अस्मिन् अवसरे पतंजलि महिला आयोग समिति मुख्यः केंद्रीय प्रभारी एवं पतंजलि विश्वविद्यालयस्य कुलानुशासिका साध्वी देवप्रिया, पतंजलि गुरुकुलम् हरिद्वारस्य प्राचार्या साध्वी देवमयी , पतंजलि हरिद्वारस्य प्राचार्यः पूज्य स्वामी ईशदेवः पतंजलि योगपीठात् अनेके साधवः मित्रगणश्च उपस्थिताः । इयं प्रतियोगिता सायं पञ्चवादने सम्पन्ना।

# संस्कृते समाहितानि सन्ति सर्वाणि जीवनस्रोतांसि-विनय श्रीवास्तवः

वार्ताहरः - सचिन शर्मा , मोदीनगरम् , उत्तरप्रदेशः।

मईमासस्य संस्कृतभाषा शिक्षणकक्षासमापनसत्रस्य आयोजनं उत्तरप्रदेशसंस्कृतसंस्थान, लखनऊद्वारा संचालितसंस्कृतभाषाशिक्षणकक्षाणाम् अन्तर्गतमभवत् । सत्रे सर्वप्रशिक्षकाः उपस्थिताः आसन्। आदौ सरस्वतीवन्दनया सह वैदिकाह्वानं एकलगीतानि च प्रस्तुतानि आसन्। स्वागतगीतात् परं सर्वे प्रशिक्षकाः उ० प्र० संस्कृतसंस्थानकक्षाणां स्वानुभवं प्रकटीकृतवन्तः। समापनकार्यक्रमस्य अवसरे प्रदेशसंस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः सर्वमूलं संस्कृतम् इति अवदत्। संस्कृते प्राप्तानि सर्वाणि शास्त्राणि भारतस्य वैभवं दर्शयन्ति। सः अवदत् यत् धर्मशास्त्राणि अस्माकं जीवनचर्यां वर्णयन्ति। यदि वयं किमपि प्राप्तुमिच्छामः तस्य एकमेव स्थानं संस्कृतमस्ति। अस्माभिः संस्कृताध्ययनेन सुजीवनं करणीयम्। तेन सह उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः अपि समापनस्य अवसरे देशस्य विश्वस्य च प्रति अस्माकं दायित्वस्य विषये अवदत्। योजनायामस्यां अधिकतमपञ्जीकरणेन जनानां लाभः, प्रशिक्षकाणां अथकपरिश्रमस्य कारणेन कक्षासञ्चालनार्थं प्रोत्साहनं, योजनायामस्यां नूतनानां जनानां अध्यापनस्य अवसराः च इत्यस्मिन् विषये अपि चर्चाः कृताः । कार्यक्रमे सर्वे प्रशिक्षकाः उपस्थिताः आसन्। तत्र योजना सर्वेक्षक डॉ. जगदानंद झा, प्रशिक्षण प्रमुखः ,सुधिष्ठ मिश्रः, संस्थाधिकारी श्री चंद्रकला शाक्यः, प्रशिक्षण समन्वयकः धीरज मैठाणी, नागेश दुबे, दिव्यारंजनः, राधा शर्मा इत्यादयः उपस्थिताः आसन्। अन्ते प्रशिक्षकाः शान्तिमन्त्रेण सत्रस्य समापनम् अकुर्वन्। संस्कृतभाषावर्गाणां (उभयस्तरस्य) निःशुल्कपञ्जीकरणार्थम्

https://sanskritsambhashan.com

# ऋषीणां तपोभूमौ गंगातटे स्थापितं नगरम् ऋषिकेशः - डॉ. महावीरअग्रवालः

हरिद्वारम्। पतंजलि विश्वविद्यालयस्य प्रति कुलपतिः डॉ. महावीर प्रसादः उक्तवान् यत् मां गंगाया तटे स्थापितं नगरं ऋषि मुनीनां तपोभूमिः । यत्र नैके ऋषयः तपः अनन्तकालं कृतवन्तः ।

गंगा दशहरापूर्व संध्यायां हरकी पैड़ी स्थिते श्री गंगा सभाकार्यालये शास्त्रेषु गंगा महात्म्य विषये संगोष्ठी



अभवत्। श्री गंगा सभा अध्यक्षः नितिन गौतमः, महामंत्री तन्मय वशिष्ठः अन्ये च पदाधिकारिणः वक्तृभ्यः अंगवस्त्रं, श्री गंगा प्रसादेन, गंगाजलिना च सह मेलनमकुर्वन्। मुख्य वक्ता गुरुकुल महाविद्यालयस्य पूर्व प्राचार्यः डा. हरि गोपाल शास्त्री मां गंगा के अवतरणस य विस्तारेण वर्णनं कृतवान्। उत्तराखण्ड शिक्षा विभागस्य पूर्व निदेशकः पुष्पा रानी वर्मा कथितवती यत् गंगया एव जीवनं यत् जलमेव जीवनम्।

उत्तराखंड संस्कृत अकादम्याः शोध अधिकारी डा. हरिश्चंद्र गुरुरानी, उत्तराखंड संस्कृत विश्वविद्यालयस्य कुलपतिः डा. दिनेश चंद्र शास्त्री, जगदेव सिंह संस्कृत महाविद्यालयस्य प्राचार्यः डॉ. राजेंद्र प्रसाद गौनियालः, उत्तराखंड संस्कृत विश्वविद्यालयस्य व्याकरण विभागीयः अध्यक्ष डॉ. शैलेश तिवारी, डॉ. सुशील कुमार त्यागी अमितः, कंचन प्रभा गौतमः स्व विचारान् प्रकटितवन्तः।



सार्वदेशिक आर्यवीरदलस्य प्रांतीय एकांशेन आर्यवीरदल दिल्ली द्वारा डी ए वी साहिबाबादे आर्यवीरदलस्य विशाल शिविरे १००० यूनां यज्ञोपवीत संस्कारः कृतः। येषु मुख्यअतिथि रूपेण पतंजलियोगपीठस्य अध्यक्षः आचार्य बालकृष्णमहाराजः उपस्थितः । सममेव दिल्ली आर्यप्रतिनिधिसभायाः महामंत्री श्री विनयआर्यः, महाशय धर्मपालआर्यः , एवं च तत् सुपुत्री श्रीमती सुषमाशर्मा समेत्य आर्य समाजस्य अधिकारिणः कार्यकर्तारश्च उपस्थिताः।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।